उष्ट्रदेशं[1] ययौ वीरः पालितं तैर्महाबलैः । धोयीकविस्तत्रनृपो लक्षसैन्यसमन्वितः ।।४६
जगन्नाथाज्ञया प्राप्तस्तैश्च सार्द्धं रणोन्मुखे । तयोश्चासीन्महद्युद्धं तुमुलं रोमहर्षणम् ।।
अहोरात्रप्रमाणेन कृष्णांशेन जितो नृपः ।।४७
विंशत्यब्दकरं सर्वं कोटिस्वर्णसमन्वितम् । सम्प्राप्य प्रेषयामास कान्यकुब्जाधिपाय वै ।।४८
पुण्ड्रदेशं ययौ वीरो लक्षणो बलवत्तरः । नृपं नागपतिं नाम पञ्चायुतबलैर्युतम् ।।
दिनमात्रेण तं जित्वा कोटिमुद्रां गृहीतवान् ।।४९
महेन्द्रगिरिमागत्य नत्वा तं भार्गवं मुनिम् । ततो निवृत्य ते सर्वे नेत्रपालपुरं ययुः ।।५०
योगसिंहस्तदागत्य कृष्णांशं प्रति भार्गव[2] । कोटिमुद्रां ददौ तस्मै सप्तरात्रमवासयत् ।।५१
वीरसिंहपुरं जग्मुस्ते वीरा मदवत्तराः । रुरुधुर्नगरीं सर्वा हिमतुङ्गोपरिस्थिताम् ।।
पालितं गोरखाख्येन योगिना भक्तकारणात् ।।५२
भूपानुजः प्रवीरश्च सैन्यायुतसमन्वितः । कृतवान्दारुणं युद्धं लक्षणस्यैव सेनया ।।५३
प्रत्यहं बलवाञ्छूरो हत्वा शूरसहस्रकम् । सायंकाले गृहं प्राप्य योगिनं तमपूजयत् ।।५४
पूजनात्स प्रसन्नात्मा सैन्यमुज्जीव्य भूपतेः । दत्त्वा गजबलं तेभ्यः पुनर्योगं करोति वै ।।५५
सार्द्धमासो गतस्तत्र युद्धचतां बलशालिनाम् । तदा ते तु निरुत्साहं देवसिंहं तमब्रुवन् ।।५६

---

वहाँ से आगे बढ़कर उष्ट्रदेशाधिपति राजा धोयी कवि की एक लाख सेना से मुठभेड़ किया । उनके भी एक लाख सैनिक थे जो जगन्नाथ की आज्ञा प्राप्तकर रणभेरी बजाते हुए युद्ध के लिए सन्नद्ध थे । दोनों सेनाओं का रोमाञ्चकारी एवं भीषण युद्ध आरम्भ हुआ । उदयसिंह ने दिन-रात के भीतर ही उस राजा को भी जीत लिया । एक करोड़ की संख्या में उन सुवर्ण मुद्राओं को, जो बीस वर्ष के कर के रूप में था उस राजा से प्राप्तकर कान्यकुब्जाधिपति जयचन्द्र के पास भेज दिया । पुनः लक्षण (लाखन) वीर ने पुण्ड्र

विजयो नः कथं भूप ब्रूहि नस्तत्त्वमग्रतः । इति श्रुत्वा स होवाच शृणु कृष्णांश मे वचः ॥५७
योगिनं गोरखं नाम पराजित्य स्वनृत्यतः । पुनर्युद्धं कुरु त्वं वै ततो जयमवाप्स्यसि ॥५८
इत्युक्तास्ते हि कृष्णाद्याः कृत्वा योगमयं वपुः । स्थापयित्वा रणे सेनां पालितां लक्षणेन वै ॥५९
प्रातःकाले ययुस्ते वै मन्दिरं तस्य योगिनः । कृष्णांशो नर्तकश्चासीद्वेणुवाद्यविशारदः ॥६०
देवसिंहो मृदङ्गाढ्यो वीणाधारी च तालनः । कांस्यधारी तदाह्लादो जगौ गीतां सनातनीम् ॥६१
तदर्थं हृदये कृत्वा गोरखस्सर्वयोगवान् । वरं वृणुत तानाह ते तच्छ्रुत्वाऽब्रुवन्वचः ॥६२
नमस्यामो वयं तुभ्यं यदि देयो वरस्त्वया । देहि संजीविनीं विद्यामाह्लादाय महात्मने ॥६३
इति श्रुत्वा हृदि ध्यात्वा तानुवाच प्रसन्नधीः । विद्या सञ्जीविनी तुभ्यं वर्षमात्रं भविष्यति ॥
तत्पश्चान्निष्फलीभूयागमिष्यति मदन्तिकम् ॥६४
अद्य प्रभृति भो वीर मया त्यक्तमिदं जगत् । यत्र भर्तृहरिः शिष्यस्तत्र गत्वा शये ह्यहम् ॥६५
इत्युक्त्वान्तर्हितो योगी जग्मुस्ते रणमूर्द्धनि । जित्वा प्रवीरसिंहं च वीरसिंहं तथैव च ॥६६
हत्वा तस्यायुतं सैन्यं लुण्ठयित्वा च तद्गृहम् । कृत्वा दासमयं भूपं लक्षणः प्रययौ मुदा ॥६७
कोशलं देशमागत्य जित्वा तस्य महीपतिम् । सैन्यायुतं सूर्यधरं करयोग्यमचीकरत् ॥६८
षोडशाब्दकरं प्राप्य मुद्राकोट्ययुतं मुदा । नैमिषारण्यमागम्य तत्रोषुः स्नानतत्पराः ॥६९
होलिकाया दिने रम्ये लक्षणो बलवत्तरः । दत्त्वा दानानि विप्रेभ्यो महोत्सवमकारयत् ॥७०

---

राजन् ! हम लोगों की विजय क्यों नहीं हो रही है, इसका कारण हमें बताने की कृपा कीजिये । इसे सुनकर उन्होंने कहा उदयसिंह ! मेरी बातें सुनो ! योगी गोरखनाथ को अपने नृत्य द्वारा पराजित करके पुनः युद्ध करने से तुम्हें निश्चय विजय प्राप्ति होगी । इतना कहने पर उदयसिंह आदि वीरों ने योगी के वेष धारणकर प्रातः काल उस योगी के मन्दिर के लिए प्रस्थान किया ।४६-६०। इधर रणस्थल में सेना

तदा वयं च मुनयः समाधिस्थाश्च भूपतिः । यदा स लक्षणः प्राप्तो नैमिषारण्यमुत्तमम् ।।७१
स्नात्वा सर्वाणि तीर्थानि सन्तर्प्य द्विजदेवताः । कान्यकुब्जपुरं जग्मुश्चैत्रकृष्णाष्टमीदिने ।।७२
इति ते कथितं विप्र यथा दिग्विजयोऽभवत् । शृणु विप्र कथां रम्यां बलखानिर्यथा मृतः ।।७३
मार्गकृष्णस्य सप्तम्यां भूमिराजो महाबलः । महीपतेश्च वाक्येन सामन्तं प्राह निर्भयः ।।७४
मया श्रुतस्ते तनयः शारदावरदर्पितः । रक्तबीजत्वमापन्नस्ते मे देहि कृपां कुरु ।।७५
इत्युक्तस्स तु सामन्तस्तेन राज्ञेव सत्कृतः । चामुण्डं नाम तनयं समाहूयाब्रवीदिदम् ।।७६
पुत्र त्वं नृपतेः कार्यं सदा कुरु रणप्रिय । इति श्रुत्वा पितुर्वाक्यं स वै राजानमब्रवीत् ।।७७
देह्याज्ञां भूपते मह्यं शीघ्रं जयमवाप्स्यसि । इति श्रुत्वा स होवाच बलखानिर्महाबलः ।।७८
मच्छिरीषवनं छित्वा गृहीत्त्वा राष्ट्रमुत्तमम् । सुस्थितो निर्भयो गेहे बाहुशाली यतेन्द्रियः ।।७९
यदि त्वं बलखानिं च जित्वा मे ह्यर्पयिष्यसि । हत्वा वा तस्य सकलं राष्ट्रं त्वयि भविष्यति ।।८०
इत्युक्त्वा रक्तबीजं तं समाहूय स्वकं बलम् । सप्तलक्षं ददौ तस्मै स तत्प्राप्य मुदा ययौ ।।८१
उषित्वा त्रिदिनं मार्गे शिरीषाख्यमुपागतः । रुरोध नगरीं सर्वां बलखानेर्महात्मनः ।।८२
चामुण्डागमनं श्रुत्वा बलखानिर्महाबलः । पूजयित्वा महामायां दत्त्वा दानान्यनेकशः ।।
लक्षसैन्येन सहितः प्रययौ नगराद्बहिः ।।८३

---

कराया। उस समय हमलोग तथा मुनिगण समाधिस्थ थे। राजा लक्षण (लाखन) नैमिषारण्य में पहुँचकर समस्त तीर्थों के स्नान पूर्वक ब्राह्मणों एवं देवताओं को प्रसन्न किये। उपरांत चैत्र कृष्ण की अष्टमी के दिन कान्यकुब्ज (कन्नौज) के लिए प्रस्थान किया। विप्र ! इस प्रकार मैंने तुम्हें उनके दिग्विजय का वर्णन सुना दिया। विप्र ! अब उस कथा को सुना रहा हूँ, जिसमें बलखानि (मलखान) के स्वर्गवासी होने का वर्णन किया गया है, सुनो ! ६१-७३ ।।बलवान् निर्भीक पृथ्वीराज ने मार्गशीर्ष

तस्यानुजो महावीरस्सुखखानिर्बलैः सह । हरिणीं तां समारुह्य शत्रुसैन्यमचिक्षपत् ॥८४
बलखानिः कपोतस्थो नाशयित्वा रिपोर्बलम् । लक्षसैन्यं मुदा युक्तश्चामुण्डं प्रति चागमत् ॥८५
तयोश्चासीन्महद्युद्धं स्व स्वसैन्यक्षयङ्करम् । अहोरात्रप्रमाणेन निहताः क्षत्रिया रणे ॥८६
प्रातःकाले तु सम्प्राप्ते कृत्वा स्नानादिकाःक्रियाः । जग्मतुस्तौ रणे वीरौ धनुर्बाणविशारदौ ॥८७
रथस्थो बलखानिश्च चामुण्डो गजपृष्ठगः । चक्रतुस्तुमुलं घोरं नरविस्मयकारकम् ॥८८
बाणैर्बाणांश्च सञ्छिद्य देवीभक्तौ च तौ मुदा । अन्योऽन्यं वाहने हत्वा भूतलत्वमुपागतौ ॥
खड्गचर्मधरौ वीरौ युयुधाते परस्परम् ॥८९
यावन्तो रक्तबीजाङ्गात्सञ्जाता रक्तबिन्दवः । तावन्तः पुरुषा जाता रक्तबीजपराक्रमाः ॥९०
तैश्च वीरैर्मदोन्मत्तैर्बलखानिस्समन्ततः । संरुद्धोऽभूद् भृगुश्रेष्ठ शारदां शरणं ययौ ॥९१
एतस्मिन्नन्तरे वीरः सुखखानिस्ततोऽनुजः । आग्नेयं शरमादाय रक्तबीजानदाहयत् ॥९२
पुरा तु सुखखानिश्च हव्यैर्देवं च पावकम् । पञ्चाब्दान्पूजयामास तदा तुष्टस्स्वयं प्रभुः ॥९३
पावकीयं शरं रम्यं शत्रुसंहारकारकम् । ददौ तस्मै प्रसन्नात्मा तेनासावभवज्जयी ॥९४
बलखानिस्तु बलवान्दृष्ट्वा शत्रुविनाशनम् । पराजितं च चामुण्डं बद्ध्वा गेहमुपागतम् ॥९५
कृत्वा नारीमयं वेषं स भीतो ब्रह्महत्यया । दोलामारोप्य बलवान्प्रेषयामास शत्रवे ॥९६
हतशेषं पञ्चलक्षं सैन्यं गत्वा च देहलीम् । वृत्तान्तं कथयामास यथा जातो महारणः ॥९७

---

बाहर रणस्थल की ओर यात्रा की। उसके छोटे भाई महाबली सुखखानि भी साथ में चल रहे थे। हरिणी नामक अश्व पर बैठकर उसने शत्रु-सैनिकों को धराशायी करना आरम्भ किया और कपोत (कबूतर) नामक अश्व पर बैठे बलखानि (मलखान) भी शत्रु की सेना का संहार कर रहे थे। पश्चात् प्रसन्नता पूर्वक वे चामुण्ड (चौंढ़ा) के पास पहुँचे। उन दोनों का घोर युद्ध आरम्भ हुआ, जिसमें दोनों दल के सैनिक शीघ्रता से नष्ट हो रहे थे। अविराम गति से दिन-रात होने वाले उस युद्ध में अनेक

नारीवेषं च चामुण्डं स दृष्ट्वा पृथिवीपतिः । क्रोधाविष्टश्च बलवान्महीपतिमुवाच ह ॥९८
कथं जयो मे भविता सुखखानौ च जीविते । श्रुत्वा महीपतिः प्राह च्छद्मना कार्यमाकुरु ॥९९
ब्राह्मी माता तयोर्ज्ञेया शुद्धा सैव पतिव्रता । दूतीभिः कारणं ज्ञात्वा पुनर्युद्धं कुरुष्व भोः ॥१००
इति श्रुत्वा महीराजो दूतीस्ताश्छलकोविदाः । आहूय प्रेषयामास बलखानिगृहं प्रति ॥१०१
ब्राह्मण्यस्तास्तदा भूत्वा बलखानिगृहं ययुः । ससुतां तां प्रशस्याशु पप्रच्छुर्विनयान्विताः ॥१०२
तव पुत्रौ महावीरौ दिष्टचा शत्रुक्षयङ्करौ । तयोर्मृत्युः कथं भूयाज्जीवतां शरदां शतम् ॥१०३
तदा ब्राह्मी वचः प्राह पावकीयः शरः शुभः । सुखखानेर्जीवकरो बलखानेः पदात्त्वकः ॥१०४
इति ज्ञात्वा तु ता दूत्यः प्रययुर्देहलीं प्रति । कथयित्वा नृपस्याग्रे धनं प्राप्य गृहं ययुः ॥१०५
महीराजस्तु तच्छ्रुत्वा महादेवमुमापतिम् । पार्थिवैः पूजनं चक्रे सहस्रदिवसान्मुदा ॥१०६

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयो नाम चतुर्विंशोऽध्यायः ।२४

# अथ पञ्चविंशोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

षड्विंशाब्दे च कृष्णांशे यथा जातं तथा शृणु । मुने बिन्दुसरो नाम दक्षिणस्यां दिशि स्थितम् ॥१

---

कर पृथ्वीराज ने क्रुद्ध होकर महीपति (माहिल) से कहा—'जब तक सुखखानि जीवित रहेगा, मेरी विजय कैसे हो सकेगी।' इसे सुनकर महीपति (माहिल) ने कहा—'छल छद्म से कार्य कीजिये।' उन दोनों वीरों की माता ब्राह्मी हैं, जिन्हें शुद्ध पतिव्रता कहा गया है। उन्हीं से दूती द्वारा उनके मरण के कारण का पता लगाकर पुनः युद्धारम्भ कीजिये। इसे सुनकर पृथ्वीराज ने एक छल-कपट निपुण दूती-वृन्द को बलखानि (मलखान) के घर भेजा। उन दूतियों ने अपना ब्राह्मणी वेष बनाकर बलखानि

तस्य तीरेऽवसद्ग्रामो योजनायामसंयुतः । नाम्ना बिन्दुगढो दुर्गो वर्णधर्मप्रवर्तकः ॥२
तस्मिन्ग्रामेऽवसद्भूपो विष्वक्सेनान्वयोद्भवः । शारदानन्दनो नाम ब्रह्मध्यानपरायणः ॥३
ब्रह्मचर्यप्रभावेण तद्वीर्य्यं शिरसि स्थितम् । अतस्स कामपालाख्यः प्रथितोऽभून्महीतले ॥४
यज्ञैः सम्पूजयामास सुरज्येष्ठं प्रजापतिम् । यज्ञांशभुक्तमात्रेण राज्ञी गर्भमुपादधौ ॥५
दशमासान्तरे जाता कन्या सर्वगुणालया । पद्मिनी नाम विख्याता सर्वशोभासमन्विता ॥६
द्वादशाब्दवयः प्राप्तौ बभूव वरवर्णिनी । पद्माकरो भूपसुतो महीराजपदानुगः ॥७
पितुराज्ञानुसारेण भूपानाहूय सत्वरम् । स्वयम्वरं भगिन्याश्च कारयामास वै मुदा ॥८
नानादेश्य ययुर्भूपा मुख्यशूरसमन्विताः । सहाह्लादैश्चतुर्वीरैर्लक्षणः पितुराज्ञया ॥९
ययौ बिन्दुगढं ग्रामं स्थितो यत्र महोत्सवः । महीराजस्तु बलवान्दृष्ट्वा लक्षणमागतम् ॥१०
स्वसेनां स्थापयामास रक्षार्थे सर्वभूभुजाम् । एतस्मिन्नन्तरे देवी सखीभिः सह पद्मिनी ॥११
सर्वभूपान्विलोक्याशु लक्षणान्तमुपाययौ । श्यामाङ्गं च युवानं च सर्वलक्षणलक्षितम् ॥१२
चत्वारिंशत्तथा पञ्चाशन्मानाब्दवयोवृतम् । व्यूढोरस्कं दृढस्कन्धं निर्जरं रोगवर्जितम् ॥१३
दृष्ट्वा तमात्मसदृशमाह्लादाद्यैश्च रक्षितम् । जयमालां ददौ तस्मै पद्मिनी लक्षणाय च ॥१४

---

चरित्रों को बता रहा हूँ, सुनो ! दक्षिण दिशा में बिन्दुसर नामक एक जलाशय (सरोवर) है, उसी के तट पर 'बिन्दुगढ़' नामक एक दुर्ग-नगर स्थित है, जो योजन भर में विस्तृत एवं वर्ण-धर्म के प्रवर्तक व्यक्तियों से सुशोभित है । उस राजधानी का अधीश्वर शारदानन्दन जो विष्वक्सेन वंश के भूषण है, ब्रह्म-ध्यान का पारायण करते हुए भी, अपनी प्रजाओं के पालन-पोषण में तत्पर रहते है । उन्होंने ब्रह्मचर्य के प्रभाव से वीर्य को शिर में स्थित कर लिया था, इसीलिए इस भूतल में वे 'कामपाल' के नाम से प्रख्यात थे । एक बार उन्होंने यज्ञानुष्ठान द्वारा देवश्रेष्ठ प्रजापति (ब्रह्मा) की आराधना किया । उसमें यज्ञ का एक अंश

तदा स लक्षणो वीरो गृहीत्वा पाणिमुत्तमम् । स्वरथं च समारुह्य राज्ञां मध्ये ययौ मुदा ॥१५
पृथ्वीराजस्तथा सर्वे भूमिपा बलसंयुताः । रुरुधुः सर्वतो वीरं लक्षणं बलवत्तरम् ॥१६
तालनः सिंहिनीसंस्थो गृहीत्वा परिघं मुदा । सैन्यानि योधयामास भीमसेनांशसम्भवः ॥१७
पञ्चशब्दगजारूढश्चाह्लादस्तोमरायुधः । रिपून्विदारयामास बलभद्रांशसम्भवः ॥१८
कृष्णांशो बिन्दुलारूढो गृहीत्वा खड्गमुत्तमम् । भूपतीन्बहुधा छित्त्वा महावधमकारयत् ॥१९
देवो मनोरथारूढो भैरवं भल्लमादधौ । हत्वा च बहुधा सैन्यं ननर्द च पुनः पुनः ॥२०
लक्षणो धनुरादाय वैष्णवास्त्राणि वै पुनः । सन्धाय च जघानाशु महीराजस्य सैन्यपान् ॥२१
याममात्रमभूद्युद्धं तेषां तैश्च समन्वितम् । त्यक्त्वा युद्धं महीराजः सर्वभूपसमन्वितः ॥२२
ययौ स देहलीग्रामे शारदानन्दनस्तदा । संस्थाप्य मण्डपशुभं कृत्वा वैवाहिकीः क्रिया ॥
ददौ कन्यां विधानेन धनधान्यादिसंवृताम् ॥२३
एतस्मिन्नन्तरे प्राप्तो महीपतिरुवाच तम् । पद्माकरं भूपसुतं लक्षसैन्यसमन्वितम् ॥२४
अहो मित्र महावीर कीदृशी ते मतिः स्थिता । विष्वक्सेनान्वये त्वं वै सञ्जातः क्षत्रियोत्तमः ॥२५
लक्षणो धर्मरहितो वर्णसङ्करसंयुतः । आह्लादाद्याश्च ते शूरा आभीरमातृसम्भवाः ॥
तैर्युतश्च निवासो वै सन्त्याज्यो धर्मकोविदैः ॥२६
इति पद्माकरः श्रुत्वा सर्वमायाविशारदः । स कृत्वा शाम्बरीं मायां बद्ध्वा तानेव दुर्जयान् ॥
स्वगेहे स्थापयामास कारागारे शिलामये ॥२७

---

कर अपने रथ पर बैठा लिया और प्रसन्न होकर राजाओं के मध्य से उसे लेकर प्रस्थान किया ।१-१५।
पृथ्वीराज ने समस्त अन्य राजाओं को साथ लेकर जाते हुए बलवान् लक्षण (लाखन) को चारों ओर से घेर लिया । पश्चात् सिंहिनी पर बैठे हुए तालन ने अपने परिध अस्त्र द्वारा जो भीमसेन के अंश से उत्पन्न

देव्याश्च वरदानेन देवसिंहस्तदा निशि । त्यक्त्वा मायां मोहमयीं कान्यकुब्जमुपाययौ ॥२८
इन्दुलाग्रे च तत्सर्वं गदित्वा तेन संयुतः । प्राप्तो विन्दुगढं शीघ्रं दिव्यमायाविशारदः ॥२९
पद्माकरस्तु तच्छ्रुत्वा कृत्वा मायां च शाम्बरीम् । मोहनायोद्यतस्तत्र यथा मेघो रविं दिवि ॥३०
इन्दुलश्च तदा चापे सन्धाय शरमुत्तमम् । कामास्त्रेण तु तन्मायाभस्मीभूताभवत्क्षणात् ॥३१
तदा ते बोधिताः सर्वे कामास्त्रेण महाबलाः । भित्त्वा लोहमयं जालं कपाटं च तथा दृढम् ॥३२
बहिर्भूताः समाजग्मुः शत्रुसैन्यान्यनाशयन् । क्षत्रियाः पञ्चसाहस्रा मृता यमपुरं ययुः ॥३३
शारदानन्दनो भूपस्तत्रागत्य विनम्य तान् । स्वसुतां च ददौ तस्मै लक्षणाय महात्मने ॥३४
नानाविधानि भोज्यानि प्रशस्याभरणानि च । सर्वेभ्यश्च ददौ राजा सहस्रेभ्यस्तदा मुदा ॥३५
कुमारिकां स्वकीयां च बहुरोदनतत्पराम् । स मत्वा कामपालो वै स्वगेहात्तं[1] न्यवासयत् ॥
आगतो लक्षणो गेहं माघकृष्णाष्टमीदिने ॥३६
जयचन्द्रस्तु तं दृष्ट्वा लक्षणं प्रेमविह्वलः । शतग्रामान्ददौ तेभ्यस्तालनादिभ्य एव च ॥३७
दत्त्वा ततोऽन्यदानानि गोवस्त्राभरणानि च । प्रददौ ब्राह्मणेभ्यश्च स चकार महोत्सवम् ॥३८

## सूत उवाच

महीराजो वरं प्राप्तः शङ्करात्पार्थिवार्चनात् । संयोज्य फाल्गुने मासि सेनां शत्रुभयङ्कराम् ॥३९
सप्तलक्षैश्च सहितः शिरीषाख्यपुरं ययौ । नृपाज्ञया च चामुण्डो रुरोध नगरं पुनः ॥४०

---

देवसिंह उसी आधी रात के समय चेतना प्राप्तकर कान्यकुब्ज (कन्नौज) चले गये । वहाँ पहुँचकर इन्दुल से समस्त वृत्तान्त का वर्णन किया । उसे सुनकर इन्दुल ने देवसिंह के समेत उसी समय बिन्दुगढ़ को प्रस्थान किया । पद्माकर ने उनका आगमन सुनकर उन्हें मोहित करने के लिए दिन में सूर्य को मेघ द्वारा आवृतकर लेने की भाँति अपनी शाम्बरी माया का प्रयोग किया ।१६-३०। किन्तु इन्दुल ने उसी समय

सुखखानिस्तदा क्रुद्धो लक्षसैन्यसमन्वितः । नगराद्बहिरागत्य महावधमकारयत् ॥४१
पावकास्त्रेण बलवान्हत्वा दशसहस्रकम् । महीराजमुपागम्य वचनं प्राह निर्भयः ॥४२
अद्य त्वां च हनिष्यामि त्वं वा हन्ता रणे मम । स्वविद्यां कुरु भूप त्वं नो चेद्यास्यसि वैशसम् ॥४३
इति श्रुत्वा महीराजो रौद्रास्त्रं चाप आदधे । तदस्त्राच्च महावह्निः प्रादुर्भूतो भयङ्करः ॥४४
सुखखानिस्तदाग्नेयं सन्दधौ तस्य शान्तये । रौद्राग्निना च सशरः सुखखानिर्लयं गतः ॥४५
तदस्त्रं शिवतूणीरे गतं कार्यं विधाय तत् । बलखानिस्तु तच्छ्रुत्वा भयभीतः समागतः ॥४६
भ्रातुर्वैरमुपादाय जघान च रिपोर्बलम् । ध्यात्वा च शारदां देवीं भूमिराजमुपागमत् ॥४७
भूमिराजस्तु तं दृष्ट्वा तद्बलाधिक्यमोहितः । उवाच वचनं प्रेम्णा बलखाने शृणुष्व भोः ॥४८
क्रोशमात्रान्तरे गर्ता द्वादशैव मया कृताः । रक्षिता द्वादशशतैः शूरैर्युद्धविशारदैः ॥४९
शूराञ्जित्वा समुल्लङ्घ्य गर्तान्द्वादशसम्मितान् । ममार्द्धं सकलं राष्ट्रं गृहाण बलिसत्तम ॥५०
इति श्रुत्वा प्रियं वाक्यं तद्राज्ञा सत्यभाषितम् । कपोतं हयमारुह्य खड्गहस्तो वनं ययौ ॥५१
दृष्ट्वा गर्तान्महावीरो हत्वा शूराञ्छतञ्छतम् । ययौ स द्वादशान्गर्त्तान्बाहुशाली जितेन्द्रियः ॥५२
चामुण्डस्तु तदागत्य शूरायुतसमन्वितः । रुरोध सर्वतो वीरं छद्मकारी द्विजाधमः ॥५३
बलखानिश्च महतीं सेनां तस्य जघान ह । चामुण्डं तमुपागम्य ननर्द च पुनःपुनः ॥५४

---

कर चामुण्ड ने पुनः क्रुद्ध होकर सुखखानि से अपनी एक लाख की सेना लेकर नगर के बाहर रणस्थल में आकर भीषण युद्ध करना आरम्भ किया। उन्होंने अपने आग्नेय अस्त्र से दशसहस्र सैनिकों के वध करने के उपरांत पृथ्वीराज के पास पहुँचकर उनसे निर्भय होकर कहा—आज मैं तुम्हरा हनन करूँगा। अथवा इस रणक्षेत्र में मेरे हन्ता तुम्हीं होगे। अतः भूप! अपनी विद्या का प्रयोग पहले कर लो, नहीं तो तुम्हें नरक की तैयारी करनी होगी। इसे सुनकर पृथ्वीराज ने अपने धनुषपर रौद्रबाण का संधान किया

**त्रयोदशं गुप्तगर्तं तृणैराच्छादितं मृदा । विषधौतैर्महाभल्लैस्संरुद्धं विवरप्रभम् ।।५५**
**पतितः सकपोतश्च स वीरो दैवमोहितः । अन्धकारे महाघोरं गम्भीरं क्रोशमात्रकम् ।।५६**
**विदीर्णस्तत्र चरणस्सपद्मो वत्सजस्य वै । महाकष्टेन तद्वाजी गर्तादागत्य वै बहिः ।।**
**स्वपदैस्ताडयामास महीराजस्य तद्बलम् ।।५७**
**चामुण्डस्तु तदागत्य बलखानेश्च वै शिरः । छित्त्वा जघान तत्सैन्यं हाहाभूतं विनेश्वरम् ।।५८**
**गजमुक्ता च तच्छ्रुत्वा चितामारोप्य वै पतिम् । दाहयामास चाङ्गानि सा पत्या सह वै सती ।।५९**
**तदा ब्रह्मा स्ववध्वा च सार्द्धमागत्य तत्र वै । सुखखानिं च संहूय ददाह तत्कलेवरम्[1] ।।६०**
**शून्यभूतं च नगरं भस्म कृत्वा स वै नृपः । जगाम देहलीं शीघ्रं महोत्साहसमन्वितः ।।६१**

**इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये**
**कलियुगीयेतिहाससमुच्चयो नाम विक्रमाख्यानकाले पञ्चविंशोऽध्यायः ।२५**

# अथ षड्विंशोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

**श्रावणे मासि सम्प्राप्ते देहलीं च महीपतिः । नागोत्सवाय प्रययौ सदैव कलहप्रियः ।।१**

---

तेरहवाँ गड्ढा भी बनाया गया था, जो केवल तृण (फूसों) और मिट्टी से नाम मात्र को आवृत कर दिया गया था । उसके नीचे विषयुक्त भाले भी गड़े थे । दैवसंयोग से घोड़ा समेत (मलखान) उसी गढ्ढे में गिर पड़ा, जो अंधकार पूर्ण, महाघोर, गंभीर एवं एक कोश में विस्तृत था । वत्सपुत्र (मलखान) के चरण भाले द्वारा विदीर्ण हो गये । उस समय उनका घोड़ा अत्यन्त कष्ट से बाहर निकलकर अपने चरणों

दृष्ट्वा नागोत्सवं तत्र गीतनृत्यसमन्वितम् । महीराजं नमस्कृत्य वचनं प्राह नम्रधीः ।।२
राजन्महावतीग्रामे कीर्तिसागरमध्यगे । वामनोत्सवमत्यन्तं तं यवव्रीहिसमन्वितः ।।
पश्य त्वं तत्र गत्वा च ममैव वचनं कुरु ।।३
इति श्रुत्वा महीराजो धुन्धकारेण संयुतः । सप्तलक्षबलैर्युक्तश्चामुण्डेन समन्वितः ।।
प्राप्तः शिरीषविपिने तत्र वासमकारयत् ।।४
महीपतिस्तु नृपतिं नत्वा वै चन्द्रवंशिनम् । उवाच वचनं दुःखी धूर्तो मायाविशारदः ।।५
राजन्प्राप्तो महीराजो युद्धार्थी त्वामुपस्थितः । चन्द्रावलीं च तनयां ब्रह्मानन्दं तवात्मजम् ।।
दिव्यलिङ्गं स सम्पूज्य बलात्काराद् ग्रहीष्यति ।।६
तस्मात्त्वं स्वबलैः सार्द्धं मया सह महामते । छद्मना तं पराजित्य नगरेऽस्मिन्सुखी भव ।।७
इति श्रुत्वा दैववशो राजा परिमलो बली । चतुर्लक्षबलैस्सार्द्धं निशीथे च समागतः ।।८
शयितान्क्षत्रियाञ्छूरान्हत्वा पञ्चसहस्रकान् । शतघ्नीं रोषणीं चक्रे बहुशूरविनाशिनीम् ।।९
तदोत्थाय महीराजः कटिमाबध्य सम्भ्रमात् । वैरिणं परमं मत्वा महद्युद्धमचीकरत् ।।१०
युद्ध्यन्त्योः सेनयोस्तत्र मलना पुत्रगृद्धिनी । शारदामादराद्गत्वा पूजयामास भक्तितः ।।११
देविदेवि महादेवि सर्वदुःखविनाशिनि । हर मे सकलां बाधां कृष्णांशं बोधयाशु च ।।१२

---

(माहिल) ने दिल्ली को प्रस्थान किया। वहाँ के पञ्चमी उत्सव को जिसमें नृत्य-गान का महान समारोह होता है, देखते हुए पृथिवीराज के पास पहुँचकर नमस्कार के उपरांत विनम्र निवेदन किया — राजन् ! महावती (महोबा) नगर के कीर्तिसागर के मध्य में यवव्रीहि युक्त वामन-महोत्सव अत्यन्त समारोह के साथ ससम्पन्न होता है। अतः मेरी नितान्त कामना है कि अबकी बार आप उस महोत्सव को

जप्त्वायुतमिमं मन्त्रं हुत्वा तर्पणमार्जने । कृत्वा सुष्वाप तद्देशमंस्तदा[१] तुष्टा स्वयं शिवा ॥१३
मलने महती बाधा क्षयं यास्यति मा शुचः ॥१४
इत्युक्त्वा शारदा देवी कृष्णांशं प्रति चागमत् । पुत्र ते जननी भूमिर्महीराजेन पीडिता ॥
क्षयं यास्यति शीघ्रं च तस्मात्त्वं तां समुद्धर ॥१५
इति श्रुत्वा वचो देव्यास्स वीरो विस्मयान्वितः । देवकीं प्रति सम्प्राप्तः कथयामास कारणम् ॥१६
सा तु श्रुत्वा वचो घोरं स्वर्णवत्या समन्विता । रुरोद भृशमुद्विग्ना विलप्य बहुधा सती ॥१७
कृष्णांशस्तु तदा दुःखी देवसिंहमुवाच ह । किं कर्तव्यं मया वीर देह्याज्ञां दारुणे भये ॥१८
तच्छ्रुत्वा तेन सहितो लक्षणेन समन्वितः । ययौ दिग्विजयार्थेन व्याजेन च महावतीम् ॥१९
तालनो भीमसेनांशः सेनापतिरुदारधीः । सप्तलक्षबलैस्सार्द्धं विनाह्लादेन संययौ ॥२०
कल्पक्षेत्रमुपागम्य योगिनस्ते तदाभवन् । सेनां निवेशयामास विपिने तत्र दारुणे ॥२१
कृष्णांशस्तालनो देवो लक्षणो बलवत्तरः । गृहीत्वा लास्यवस्तूनि युद्धभूमिमुपागमन् ॥२२
सप्ताहं च तयोर्युद्धं जातं मृत्युविवर्द्धनम् । सप्तमेऽहनि ते वीरास्सम्प्राप्ता रणमूर्द्धनि ॥२३
तस्मिन्दिने महाभाग महद्युद्धमवर्तत ॥२४
दृष्ट्वा पराजितं सैन्यं राजा परिमलो बली । रथस्थश्चापमादाय महीराजमुपाययौ ॥२५
यादवश्च गजारूढस्तदा चन्द्रावलीपतिः । धुन्धुकारं समाहूय धनुर्युद्धमचीकरत् ॥२६

---

कराओ। देवी के मंत्र की दश सहस्र आवृति जप, हवन, तर्पण और मार्जन करने के उपरांत उसी मन्दिर में उन्होंने शयन किया। स्वप्न में देवी शारदा ने उनसे यह कहकर कि 'मलने देवि ! शोक मत करो, तुम्हारी यह बड़ी बाधा शीघ्र नष्ट हो जायेगी तथा उदयसिंह के पास जाकर स्वप्न में उनसे कहा—पुत्र ! तुम्हारी जन्म-भूमि राजा के द्वारा कष्टयुक्त है इसलिए उसका उद्धार करो अन्यथा वह शीघ्र विनष्ट हो

हरिनागरमारुह्य ब्रह्मानन्दो महाबलः । तारकं शत्रुमाहूय धनुर्युद्धं चकार ह ॥२७
मर्दनं राजपुत्रं च रणजिद्गजसंस्थितः । स्वशरैस्ताडयामास तत्सुतं च जघान ह ॥२८
रूपणो वै सरदनं हयारूढो जगाम ह । आभीरीतनयो जातो मदनो नाम वै बली ॥
नृहरं राजपुत्रं च शङ्खांशश्च जगाम ह ॥२९
तेषु सङ्ग्राममेतेषु[1] चामुण्डोऽयुतसैन्यपः । महीपतेश्च वचनं मत्वा नगरमाययौ ॥३०
ददर्श नगरीं रम्यां चतुर्वर्णसमन्विताम् । धनधान्ययुतां वीरो देवीभक्तिपरायणः ॥३१
महीपतिस्तु वै धूर्तो दुर्गद्वारि समागतः । चामुण्डेन युतः पापी राजगेहमुपाययौ ॥३२
मलना भ्रातरं दृष्ट्वा वचनं प्राह दुःखिता । भाद्रकृष्णाष्टमी चाद्य यवव्रीहि[2] गृहे स्थितम् ॥३३
न प्राप्तं जल संस्थाने सुपुण्ये कीर्तिसागरे । महीराजो महापापी वामनोत्सवमागतः ॥३४
विनाह्लादं च कृष्णांशं महद्दुःखमुपागतम् । इत्युक्तस्स विहस्याह ब्राह्मणोऽयं महाबली ॥
कान्यकुब्जात्समायातः कृष्णांशेन प्रयोजितः ॥३५
देवीदत्तश्च नाम्नाऽयं स ते कार्यं करिष्यति । श्रुत्वा चन्द्रावली देवी सर्वभूषणसंयुता ॥३६
कामाग्निपीडितं विप्रं चामुण्डं च ददर्श ह । मातरं प्रति चागम्य वचनं प्राह निर्भरम् ॥३७
धूर्तोऽयं ब्राह्मणो मार्तनिश्चयं मां हरिष्यति । कोऽयं वीरो न जानामि कथं यामि पतिव्रता ॥३८

---

एवं हरिनागर पर बैठे हुए ब्रह्मानन्द अपने शत्रु तारक (ताहर) को ललकारकर उनसे धनुर्युद्ध करने लगे। उसी प्रकार रणजित् ने अपने शत्रु राजपुत्र मर्दन को अपने बाण प्रहारों से व्याकुल करते हुए उनके पुत्र का निधन कर दिया। रूपण अश्वारूढ़ होकर युद्ध कर रहा था, अहीरिन के गर्भ से उत्पन्न मदन जो शंख के अंश से उत्पन्न था, राजपुत्र नृहरि के साथ घोर युद्ध में लीन था। इस प्रकार उन वीरों के युद्ध करते समय चामुण्ड ने महीपति (माहिल) के

इति श्रुत्वा वचस्तस्या लज्जितस्स महीपतिः । चामुण्डेन युतः प्राप्तो यत्राभूत्स महारणः ॥३९
एतस्मिन्नन्तरे ते वै ब्रह्माद्यास्तैः पराजिताः । त्यक्त्वा युद्धं गृहं प्राप्तास्त्रिलक्षबलसंयुताः ॥४०
कपाटं सुदृढं कृत्वा महाचिन्तामुपाययुः । महीराजस्तु बलवान्महीपत्यनुमोदितः ॥४१
प्रमदावनमागत्य षष्टिलक्षबलान्वितः । जुगोप तत्र बलवान्माननोत्सवहेतवे ॥४२
तालनाद्याश्च चत्वारः शिरीषाख्यपुरं ययुः । स्थलीभूतं च तं ग्रामं दृष्ट्वा ते विस्मयान्विताः ॥
प्रययुस्ते सुखभ्रष्टा ददृशुर्हि मदं मुनिम् ॥४३
प्रणम्योचुः शुचाविष्टा बलखानिर्मुने बली । क्व गतः समरश्लाघी स च कुनागरैर्युतः ॥४४
श्रुत्वाह हिमदो योगी महीराजेन नाशितः । छद्मना बलखानिश्च तस्येयं सुन्दरी चिता ॥४५
इति श्रुत्वा वचो घोरं कृष्णांशः शोकतत्परः ॥४६
विललाप भृशं तत्र हा बन्धो धर्मजांशक । त्वदृते भूतले वासो ममातीव भयङ्करः ॥४७
दर्शनं देहि मे क्षिप्रं नो चेत्प्राणांस्त्यजाम्यहम् ॥४८
इत्युक्तः स तु तद्भ्राता बलखानिः पिशाचगः । सपत्नीकस्समायातो रोदनं कृतवान्बहु ॥
कथित्वा[1] सर्ववृत्तान्तं यथाजातं स्ववैशसम् ॥४९
दिव्यं विमानमारुह्य गतो नाकं मनोरमम् । युधिष्ठिरे तस्य कला बलखानेर्लयं गता ॥५०
तदा दुःखी स कृष्णांशः कृत्वा भ्रातुस्तिलाञ्जलिम् । महावतीं समागत्य राजगेहमुपाययौ ॥५१

---

(कीर्तिसागर) जा सकती हूँ। इसे सुनकर महीपति (माहिल) अत्यन्त लज्जित होकर चामुण्ड समेत उस रणस्थल में चला गया। उसी बीच पराजित होकर ब्रह्मादि अपने शेष तीन लाख सैनिकों को लेकर दुर्ग के द्वार को दृढतर बन्दकर भीतर अत्यन्त चिंतित हो रहे थे। उधर माहिल के कथनानुसार पृथ्वी

वेणुशब्देन कृष्णांशो ननर्त जनमोहनः । वीणाप्रवाद्यं च जगौ तालनो योगिरूपधृक् ।।५२
मृदङ्गध्वनिना देवो लक्षणः कांस्यवाद्यकः । सुस्वरं च जगौ तत्र श्रुत्वा राजा विमोहितः ।।५३
तदा तु मलना राज्ञी दृष्ट्वा तद्वामनोत्सवम् । रुदित्वा वचनं प्राह क्व गतो मे प्रियङ्करः ।।५४
कृष्णांशो बन्धुसहितस्त्यक्त्वा मां मन्दभागिनीम् । त्वया विरहितो देशो महीराजेन लुण्ठितः ।।५५
इत्युक्त्वा मलनां दृष्ट्वा कृष्णांशः स्नेहकातरः । वचनं प्राह नम्रात्मा देवि त्वं वचनं कुरु ।।५६
योगिनश्च वयं राज्ञि सर्वयुद्धविशारदः । तवेदं सकलं कार्यं कृत्वा यामो हि नैमिषम् ।।५७
ये यवव्रीहयश्चैव तव सद्मनि संस्थिताः । गृहीत्वा योषितस्सर्वा गच्छन्तु सागरान्तिकम् ।।
वयं तु योगसैन्येन तव रक्षां च कुर्महे ।।५८
इति श्रुत्वा वचस्तस्य तत्सुता च पतिव्रता । मातरं वचनं प्राह कृष्णांशोऽयं न नर्तकः ।।५९
पुण्डरीकनिभे नेत्रे श्यामाङ्गं तस्य सुन्दरम् । कृष्णांशेन विना मातः को रक्षार्थं क्षमो भुवि ।।
दुर्जयश्च महीराजः कृष्णांशेन विनिर्जितः ।।६०
इति तद्वचनं श्रुत्वा मलना प्रेमविह्वला । यवव्रीहयो निष्कास्य योषितां स्थापिता करे ।।६१
जगुस्ता योषितस्सर्वाः कृष्णांशचरितं शुभम् । लक्षणः शीघ्रमागम्य योगिवेषान्स्वसैनिकान् ।।
सज्जीकृत्य स्थितस्तत्र तालनाद्यैः सुरक्षितः ।।६२
कीर्तिसागरमागम्य ते वीरा बलदर्पिताः । रुरुधुः सर्वतो नारीर्दोलायुतमितस्थिताः ।।६३

---

तिलाञ्जलि प्रदानकर महावती (महोवा) के राजमहल में पहुँच गये । वहाँ उदयसिंह ने वंशी बजाते हुए अपने नृत्य द्वारा देखने वालों को मोहित कर दिया । उस नृत्य में योगीरूप धारणकर तालन वीणा, देवसिंह मृदङ्ग और लक्षण (लाखन) मजीरा बजा रहे थे। उस सुरीली तान को सुनकर राजा (परिमल) मोहित हो गये । उस समय रानी मलना उस वामनोत्सव को देखकर रुदन करती हुई कहने लगी—मेरा प्यारा कहाँ चला गया,

महीपतिस्तु कुलहा ज्ञात्वा कृष्णांशमागतम् । चन्द्रवंशिनमागम्य सपुत्रश्च रुरोद ह ॥६४
योगिभिस्तैर्महाराज लुण्ठिताः सर्वयोषितः । मलना संहृता तत्र तथा चन्द्रावली सुता ॥६५
महीराजस्य ते सैन्या[1] योगिवेषास्समागताः । तारकाय सुतां प्रादान्महीराजाय मत्स्वसाम्[2] ॥६६
इति श्रुत्वा वचो घोरं ब्रह्मानन्दो महाबलः । लक्षसैन्यान्वितस्तत्र ययौ रोषसमन्वितः ॥६७
महीराजस्तु कलही सैन्यायुतमहात्मजः । रक्षितः कामसेनेन तथा रणजिता ययौ ॥६८
तयोश्चासीन्महद्युद्धं सेनयोरुभयोर्भुवि । तालनो योगिवेषश्च ब्रह्मानन्दमुपाययौ ॥६९
लक्षणश्चाभयं शूरं देवसिंहो महीपतिम् । जित्वा बद्ध्वा च मुदितौ कामसेनस्समागतः ॥७०
लक्षणः कामसेनं च देवो रणजितं तदा । बद्ध्वा तत्र स्थितौ वीरौ शत्रुसैन्यक्षयङ्करौ ॥७१
एतस्मिन्नन्तरे ब्रह्मा बद्ध्वा वै तालनं बली । लक्षणान्तमुपागम्य धनुर्युद्धमचीकरत् ॥७२
लक्षणं छिन्नधन्वानं पुनर्बद्ध्वा महाबलः । देवसिंहमुपागम्य मूर्छितं तं चकार ह ॥७३
हाहाभूते योगिसैन्ये प्रद्रुते सर्वतो दिशम् । कृष्णांशो योषितस्सर्वा वचनं प्राह नम्रधीः ॥७४
ब्रह्मानन्दोऽयमायातो मम सैन्यक्षयङ्करः । तस्माद्यूयं मया सार्द्धं गच्छताशु च तं प्रति ॥७५
इत्युक्त्वा तास्समादाय ब्रह्मानन्दमुपाययौ । तयोश्चासीन्महद्युद्धं नरनारायणांशयोः ॥७६

---

कर स्वतन्त्रता पूर्वक कार्य करने के लिए उन्हें प्रोत्साहित किया। उस समय कलहप्रिय महीपति (माहिल) ने उदयसिंह का आगमन जानकर पुत्र समेत चन्द्रवंशी परिमल के पास पहुँचकर रुदन करते हुए उनसे कहा—महाराज ! उन योगियों ने सब स्त्रियों को लूट लिया, जिसमें मलना और चन्द्रावली का भी अपहरण हुआ है। योगी के वेष में आये हुए वे सभी सैनिक पृथ्वीराज के ही थे जिन्होंने पुत्री (चन्द्रावली) तारक (ताहर) को और मेरी भगिनी (मलना) को पृथ्वीराज को सौंप दिया है। इस घोर वाणी को सुनकर महाबली ब्रह्मानन्द ने अत्यन्त क्रुद्ध होकर अपने एक लक्ष सैनिकों समेत उस स्थान को प्रस्थान किया जहाँ पृथ्वीराज अपने एक सहस्र सैनिकों के सहित उपस्थित थे। उनकी सेनाओं की रक्षा कामसेन तथा रणजित विशेष सावधानी से कर रहे थे। वहाँ की रणस्थली में दोनों सेनाओं का घोर

कृष्णांशस्तु बलवान्नभोमार्गेण तं प्रति । रथस्थं च समागम्य मोहयामास सोऽसिना ॥७७
तदा तु मूर्च्छिते तस्मिन्मोचयित्वा च ता मुदा । योगी सैन्यान्वितो युद्धात्पलायनपरोऽभवत् ॥७८
पराजिते योगिसैन्ये ब्रह्मानन्दो महाबलः । योषितस्ताः समादाय स्वगेहाय दधौ मनः ॥७९
महीराजस्तु सम्प्राप्तो महीपत्यनुमोदितः । रुरोध सर्वतो नारी शिवदत्तवरो बली ॥८०
नृहरश्चाभयं शूरं मर्दनश्चैव रूपणम् । मदनं वै सरदनो ब्रह्मानन्दं च तारकः ॥८१
चामुण्डः कामसेनं च धनुर्युद्धमचीकरत् । तदाभयो महावीरो धुन्वन्तं नृहरं रिपुम् ॥८२
छित्त्वा धनुस्तमागत्य खड्गयुद्धमचीकरत् । नृहरः खड्गरहितोऽभवद्युद्धपराङ्मुखः ॥
तमाह वचनं क्रुद्धोऽभयो युद्धार्थमुद्यतः ॥८३
भवान्वै मातृष्वस्रीयो महीराजस्य चात्मजः ॥८४
क्षत्रियाणां परं धर्मं कथं संहर्तुमिच्छति । इति श्रुत्वा तु नृहरो गृहीत्वा परिघं रुषा ॥८५
जघान तं च शिरसि स हतः स्वर्गमाययौ । स च वै कृतवर्मांशो विलीनः कृतवर्मणि ॥८६
मदनं गोपजातं च हत्वा सरदनो बली । जयशब्दं चकारोच्चैर्पुनर्हत्वा रिपोर्बलम् ॥
उत्तरांशश्च स ज्ञेयो मदनश्चोत्तरे लयः ॥८७
रूपणश्च समागत्य मूर्छयित्वा च मर्दनम् । पुनस्सरदनं प्राप्य खड्गयुद्धं चकार ह ॥८८
ब्रह्मानन्दश्च बलवान्स बद्ध्वा तारकं रुषा । महीराजान्तमागम्य धनुर्युद्धं चकार ह ॥८९
नृहरं रणजित्प्राप्य स्वभल्लेन तदा रुषा । जघान समरश्लाघी महीराजसुतं शुभम् ॥९०

---

पहुँचकर तलवार द्वारा उन्हें मूर्च्छित कर दिया। पश्चात् उनके मूर्च्छित हो जाने पर उन्होंने तालन आदि को मुक्त बंधन किया। उपरांत अपनी योगी वेषधारी सेना समेत रणस्थल से प्रस्थान कर दिया। योगी सैनिकों के पराजित होने पर महाबली ब्रह्मानन्द ने उन समस्त स्त्रियों को साथ लेकर घर के लिए प्रस्थान किया। उसी बीच महीपति (माहिल) के अनुमोदन करने पर बलवान् पृथ्वीराज ने जिन्हें शिव

स वै दुश्शासनांशश्च मृतस्तस्मिन्समागतः ॥९१
निहते नृहरे बन्धौ मर्दनः क्रोधतत्परः । स्वशरैस्ताडयामास सात्यकेरंशमुत्तमम् ॥९२
छित्त्वा तान्रणजिच्छूरस्स वै परिमलोद्भवः । स्वभल्लेन शिरः कायान्मर्दनस्य स चाहरत् ॥९३
मृतेऽस्मिन्मर्दने वीरे तदा सरदनो बली । ताडयामास तं वीरं स्वभल्लेनैव वक्षसि ॥९४
महत्कष्टमुपागम्य रणजिन्मलनोद्भवः । स्वखड्गेन शिरः कायादपाहरत वैरिणः ॥९५
त्रिबन्धो[1] निहते युद्धे तारकः क्रोधमूर्छितः । रथस्थश्च रथस्थं च ताडयामास वै शरैः ॥९६
छित्त्वा बाणं च रणजित्तथैव च रिपोर्द्धनुः । त्रिशरैस्ताडयामास कर्णांशं तारकं हृदि ॥९७
अमर्षवशमापन्नो यथा दण्डैर्भुजङ्गमः । ध्यात्वा च शङ्करं देवं विषधौतं शरं पुनः ॥९८
सन्धाय तर्जयित्वा च शत्रुकण्ठमताडयत् । तेन बाणेन रणजित्त्यक्त्वा देहं दिवं गतः ॥९९
हते तस्मिन्महावीर्ये ब्रह्मानन्दश्च दुःखितः । महीराजभयाद्ब्रह्मा पुरस्कृत्य च योषितः ॥
सन्ध्याकाले तु सम्प्राप्ते भाद्रकृष्णाष्टमीदिने ॥१००
कपाटं सुदृढं कृत्वा सैन्यैः षष्टिसहस्रकैः । सार्द्धं गेहमुपागम्य शारदां शरणं ययौ ॥१०१
महीराजस्तु बलवान्पुत्रशोकेन दुःखितः । सङ्कल्पं कृतवान्घोरं शृण्वतां सर्वभूभृताम् ॥१०२
शिरीषाख्यपुरं रम्यं यथा शून्यं मया कृतम् । तथा महावती सर्वा ब्रह्मानन्दादिभिस्सह ॥
क्षयं यास्यन्ति मद्बाणैः सर्वे ते चन्द्रवंशिनः ॥१०३

---

नृहर का जन्म दुःशासन के अंश से हुआ था, इसीलिए निधन होने पर उसी के अंश में विलीन हो गया। नृहर के मरणोपरांत क्रुद्ध होकर मर्दन अपने बाणों द्वारा उस सात्विक अंश (रणजित्) पर घात-प्रतिघात करना आरम्भ किया। परिमल पुत्र रणजित् ने उनके बाणों को छिन्न-भिन्नकर अपने भल्लास्त्र द्वारा मर्दन के शिर को शरीर से पृथक् कर दिया। वीर मर्दन के निधन होने पर बली सरदन ने अपने भल्लास्त्र द्वारा वीर रणजित् के वक्षस्थल में प्रहार किया। मलना-पुत्र रणजित् ने उस अस्त्र द्वारा ताडित होने पर अत्यन्त कष्ट का अनुभव करते हुए अपने खड्ग द्वारा उस वैरी के शिर को छिन्न-भिन्न कर दिया। तीनों

इत्युक्त्वा धुन्धुकारं वै चाह्वयामास भूपतिः। पञ्चलक्षबलैस्सार्द्धं शीघ्रमागम्यतां प्रिय ॥१०४
इति श्रुत्वा धुन्धुकारो गत्वा शीघ्रं च देहलीम्। उषित्वा सप्त दिवसान्युद्धभूमिमुपागमत् ॥१०५
तदाष्टलक्षसहितो महीराजो महाबलः। तारकेण च संयुक्तो युद्धाय समुपाययौ ॥१०६

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयो नाम षड्विंशोऽध्यायः।२६

# अथ सप्तविंशोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

सप्तविंशाब्दके प्राप्ते कृष्णांशे सर्वमङ्गले। भाद्रकृष्णदशम्यां च मलना शोककातरा॥
जननायकमाहूय वचनं प्राह दुःखिता ॥१
अये कच्छपदेशीय गोतमान्वयसम्भव। हरिनागरमारुह्य कान्यकुब्जं व्रजाधुना ॥२
पुत्रमाह्लादमाहूय सानुजं मत्प्रियङ्करम्। इति श्रुत्वा तु वचनं हृदि सञ्चिन्त्य वै पुनः ॥३
मलनां दुःखितां प्राह न त्वायास्यति स प्रभुः। राज्ञः परिमलस्यैव वाक्यं मत्वा सुदुःखदम् ॥४
इति श्रुत्वा तु वचनं रुरोद मलना सती। पुनर्मूर्च्छां गता भूमौ जीवनं त्यक्तुमुद्यता ॥५

---

कहा—प्रिय ! पाँच लाख सैनिकों को लेकर तुम भी शीघ्र यहाँ आ जाओ। इसे सुनकर धुंधुकार (धांधू) दिल्ली जाकर सात दिन के भीतर पुनः उस रणभूमि में आ गये। पश्चात् तारक (ताहर) समेत महाबली पृथ्वीराज ने अपने आठ लाख सैनिकों को साथ ले पुनः युद्ध की तैयारी की।९१-१०६

हा रामांश महाबाहो वत्स कृष्णांश सुन्दर । क्व गतौ सह देवक्या त्यक्त्वा मां मन्दभागिनीम् ।।६
तदा परिमलापुत्रो दृष्ट्वा राज्ञीं तथा गताम् । बहुधाश्वास्य बलवान्कान्यकुब्जपुरं ययौ ।।७

### ऋषय ऊचुः

त्वया परिमलापुत्रस्सम्प्रोक्तो जननायकः । रोमहर्षण नो ब्रूहि सोऽयं कस्तेन किं कृतम् ।।८

### सूत उवाच

इन्द्रप्रस्थपुरेवात्सीत्प्रद्योतः कथितो मया । पिता परिमलस्यैवामात्योऽनङ्गमहीपतेः ।।९
तस्य कन्या समाजाता नाम्ना परिमला मुने । दुःशलांशसमुद्भूता रम्भेव सुकुमारिका ।।१०
तद्विवाहार्थमुद्योगः कृतः पित्रा स्वयम्वरः । पुत्रः कच्छपभूपस्य स नाम्ना कमलापतिः ।।
तामुद्वाह्य विधानेन स्वगेहाय ययौ मुदा ।।११
तयोस्समागमो जातः पुत्रोऽयं जननायकः । शत्रुविद्यापरः शूरः खड्गयुद्धविशारदः ।।१२
जित्वा भूपान्बलाद्वीरः सिन्धुतीरनिवासिनः । षडशङ्करमादाय पितृराज्यमुपस्थितः ।।१३
एकदा तु महीराजः स्वसैन्यपरिवारितः। कच्छदेशमुपागम्य करार्थं समुपस्थितः ।।१४
तयोश्चासीन्महद्युद्धं जननायकभूपयोः । मासान्ते सूर्यवंशीयो महीराजेन निर्जितः ।।१५
त्यक्त्वा राष्ट्रं च सकुलः सम्प्राप्तश्च महावतीम् । परिमलस्तु तदा राजा तस्मै ग्रामं शुभं ददौ ।।१६
निवासं कृतवांस्तत्र स्वनाम्ना प्रथितं भुवि । स वै कच्छपदेशीयो ययौ परिमलाज्ञया ।।१७

---

प्यारे उदयसिंह ! मुझ हत भागिनी को छोड़कर देवकी को साथ लेकर तुम लोग कहाँ चले गये । उस समय परिमल पुत्र (जननायक) ने रानी को अनेक प्रकार के आश्वासन प्रदान किया और पश्चात् कन्नौज की यात्रा की ।१-७

तदासौ च महीराजो महीपत्यनुमोदितः । चामुण्डं शीघ्रमाहूय लक्षसैन्यसमन्वितम् ॥
आदेशं कृतवान्राजा तस्य बन्धनहेतवे ॥१८
स च नेत्रवतीकूले सम्प्राप्ते लक्षसैन्यपः । रुरोध सूर्यवंशीयं जननायकमुत्तमम् ॥१९
स तदा खड्गमादाय बाहुशाली यतेन्द्रियः । तत्र शूरशतं हत्वा नभोमार्गमुपाययौ ॥२०
सेनापतेश्च मुकुटं गजस्थस्य गृहीतवान् । लज्जितः स तु चामुण्डो वचनं प्राह नम्रधीः ॥२१
भवान्वृत्तिकरो मह्यं क्षत्रियो ब्राह्मणस्य वै । देहि मे मुकुटं वीर चिरञ्जीवसुखीभव ॥२२
इति श्रुत्वा स विनयं दत्त्वा तस्मै शुभं वसु । कुठारनगरे प्राप्तो वामनेन सुरक्षितः ॥२३
दृष्ट्वा तत्र वटच्छायां श्रमेणातीव कर्षितः । सुष्वाप निर्भयो वीरस्तत्र स्थाने सुखप्रदे ॥२४
तदा तु वामनो ज्ञात्वा स्वदूतैस्तत्र कारणम् । वस्त्राण्याच्छाद्य चागम्य चाहरद्धरिनागरम् ॥२५
हृते तस्मिंश्च दिव्याश्वे प्रबुद्धो जननायकः । चिन्तामवाप्य महतीं रोदनं कृतवान्बहु ॥२६
अश्वाङ्घ्रिचिह्नमालोक्य वामनं प्राप्य निर्भयः । वचनं प्राह नम्रात्मा नृपं गौरान्वयोद्भवम् ॥२७
क्षत्रियाणां हि संहास्यो भयदो भुवि सर्वदा । स भवान्राजनीतिज्ञो देहि मेऽश्वं सुखीभव ॥२८
नो चेत्त्वां वै सनगरं कृष्णांशः क्षपयिष्यति । इति श्रुत्वा तु वचनं वामनो गौरवंशजः ॥२९
भयभीतो विनिश्चित्य प्रददौ हरिनागरम् ॥३०
प्रतोदं स्वर्णरचितं नानारत्नसमन्वितम् । लोभाच्च न ददौ राजा मृषा शपथकारकः ॥३१
तदा परिमलापुत्रः कुण्ठितः प्राह भूपतिम् । प्रतोदलोभात्ते राजन्क्षयं दुर्गो गमिष्यति ॥३२

---

महीपति (माहिल) के अनुमोदन करने पर पृथ्वीराज ने चामुण्ड (चौढ़ा) को आज्ञा प्रदान की कि एक लाख सैनिकों समेत तुम जननायक को बाँध लो इसे शिरोधार्य कर सेनानायक चामुण्ड (चौढ़ा) ने वेत्रवती (बेतवा) नामक नदी के तटपर पहुँचकर सूर्यवंशीय जननायक को रोक लिया। उपरांत उस बाहुशाली एवं

इत्युक्त्वा प्रययौ वीरः कान्यकुब्जं महोत्तमम् । लक्षणो हस्तिनीसंस्थो वचनं प्राह गर्वितः ।।
कस्त्वं प्राप्तो हयारूढो निर्भयः क्षत्रियोत्तमः ।।३३
स होवाच महाराज प्रेषितश्चन्द्रवंशिना । तवान्तिकं समायातः शरणागतवत्सल ।।३४
महीराजश्च बलवान्सकुलं चन्द्रवंशिनम् । हनिष्यति च रौद्रास्त्रैर्महीपत्यनुमोदितः ।।३५
अतस्त्वं स्वबलैस्सार्द्धं सहाह्लादादिभिर्युतः । गच्छ गच्छ महाराज मृतानुज्जीवयाधुना ।।३६
इत्युक्तो लक्षणस्तेन जयचन्द्रं प्रणम्य सः । सर्वं वै कथयामास महीराजो यथागतः ।।३७
जयचन्द्रस्तु तच्छ्रुत्वा चाहूय जननायकम् । वचनं प्राह क्रुद्धात्मा शृणु गौतमवंशज ।।३८
राजा परिमलः क्रूरस्त्यक्त्वा मां निजभूपतिम् । प्रीतिं च कृतवांस्तेन मच्छत्रोर्देहलीपतेः ।।३९
प्रियं सम्बन्धिनं मत्वा संत्यक्तास्तेन रक्षकाः । यथा कृतं फलं तेन भोक्तव्य च तथा भुवि ।।४०
इति श्रुत्वा तु वचनं कृष्णांशः प्राह नम्रधीः । राजन्क्षुद्धः परिमलो महीपत्यनुवाचकः ।।
अतो वै त्वां समुत्सृज्य भूमिराजवशं गतः ।।४१
भवान्वै सर्वधर्मज्ञस्तत्क्षमस्वापराधकम् । आज्ञां देहि महाराज निवत्स्यामस्तदन्तिकम् ।।४२
इति श्रुत्वा तु वचनं जयचन्द्रो महीमतिः । कृष्णांशः प्राह भो वीर देहि मे भुक्तिमूल्यकम् ।।
(शीघ्रं) व्रज त्वं सकुलो नो चेन्नो गन्तुमर्हसि ।।४३
इति श्रुत्वा विहस्याह कृष्णांशस्सर्वमोहनः । मया दिग्विजयः सर्वः कृतो भीरुभयङ्करः ।।
तद्देयं देहि मे राजन्गृहाण भुक्तिमूल्यकम् ।।४४

---

प्रत्युत झूठी शपथ करने लगे। उनके शपथ से कुंठित होकर परिमल पुत्र (जननायक) ने कहा—राजन्! यह प्रतोद (कोड़े) का लोभ आपके दुर्ग का विनाश कर देगा। इतना कहकर वह वीर उत्तम कन्नौजपुरी में पहुँचा कि हस्तिनी पर बैठे हुए लक्षण (लाखन) ने अभिमान वश कहा—घोड़े पर बैठकर निर्भीक तथा उत्तम क्षत्रिय की भाँति तुम कौ हो। उन्होंने कहा—महाराज—चन्द्रवंशी (परिमल) ने मुझे भेजा है,

इत्युक्तस्स तु भूपालः कृष्णांशेन विलज्जितः । सैन्यमाज्ञापयामास सप्तलक्षं महाबलम् ।।४५
तदा वै सकुलो वीरश्चाह्लादो लक्षणान्वितः । नृपस्याग्रे समास्थाय नमस्कृत्य ययौ मुदा ।।४६
कुठारनगरं प्राप्य नृपदुर्गं रुरोध ह । ज्ञात्वा स वामनो भूपः प्रतोदं च ददौ मुदा ।।४७
सैन्यायुतयुतं भूपं वामनं लक्षणो बली । पश्चात्कृत्य ययौ शीघ्रं यमुनातटमुत्तमम् ।।४८
यमुनाजलमुत्तीर्य कल्पक्षेत्रमवाप्तवान् । गङ्गासिंहं च नृपतिं षष्टिसाहस्रसंयुतम् ।।
पुरस्कृत्य ययौ वीरो लक्षणो बलवत्तरः ।।४९
नदीं वेत्रवतीं रम्यां समागम्य बलैस्सह । तत्रोषुः क्षत्रियाः शूरास्सर्वशस्त्रास्त्रसंयुताः ।।५०
एतस्मिन्नन्तरे वीरश्चामुण्डो लक्षसैन्यपः । शतघ्नीः स्थापयामास भैरवीः शत्रुनाशिनीः ।।५१
तयोश्चासीन्महद्युद्धं शतघ्नीरणसंस्थयोः । प्रहरान्ते च तत्सैन्यं दृष्ट्वा शूरः पराजितम् ।।५२
रक्तबीजः समागम्य गजस्थस्त्वरितो बली । स्वबाणैस्ताडयामास सैन्यं तालनपालितम् ।।५३
केचिच्छूरा हता युद्धे केचित्तत्र पराजिताः । दुद्रुवुर्भयभीताश्च चामुण्डेन च पीडिताः ।।५४
प्रभग्नं स्वबलं दृष्ट्वा तालनः परिघायुधः । जघान तेन स गजं चामुण्डो भूमिमागतः ।।५५
खड्गयुद्धपरो वीरस्तालनं परिघायुधम् । पराजित्य ययौ पश्चाच्छत्रुसैन्यक्षयङ्करः ।।५६
लक्षणस्त्वरितो गत्वा स्वभल्लेन च तं रिपुम् । भुजयोस्ताडयामास तदा ते बहुधाऽभवन् ।।५७

---

लें। उदयसिंह के इस प्रकार कहने पर अत्यन्त लज्जित होते हुए राजा ने अपेन सात लाख सैनिकों को उनके साथ जाने का आदेश दिया। वीर उदयसिंह ने अपने सभी परिवार एवं लक्षण (लाखन) को भी साथ ले राजा के सामने जाकर उन्हें प्रणाम करके वहाँ से प्रस्थान किया। मार्ग में चलते हुए सर्वप्रथम कुठार नगर के दुर्ग को घेर लिया। उनका आगमन जानकर राजा वामन ने सहर्ष उस प्रतोद (कोड़े) को उन्हें प्रदान किया। बलवान् लक्षण (लाखन) ने दश सहस्र सेना समेत आये हुए उन वामन को पीछे आने

सहस्रं रक्तबीजाश्च खड्गशक्त्यृष्टिपाणयः । तिष्ठतिष्ठेति भाषन्तः क्षत्रियान्युद्धदुर्मदान् ।।५८
आह्लादाद्याश्च ते शूरा रक्तबीजभयातुराः । त्यक्त्वा युद्धं ययुस्सर्वे ब्रह्मानन्दं महाबलम् ।।५९
ब्रह्मानन्दस्तु तान्दृष्ट्वा गत्वा स्वपितरं प्रति । वृत्तान्तं कथयामास लक्षणागमनं मुनेः ।।६०
श्रुत्वा परिमलो राजा प्रेमविह्वलगद्गदः । आह्लादपार्श्वमागम्य रुरोद भृशमातुरः ।।६१
तदा तु देवकी देवी नृपतिं प्रेमतत्परम् । उवाच सुमुखी दीना वयं ते भक्तितत्पराः ।।६२
भवता सम्परित्यक्ता विचरामोऽन्यभूपतिम् । क्षमस्व मम दौरात्म्यं पूर्वजन्मविपाकजम् ।।६३
इति श्रुत्वा च नृपतिः परमानन्दनिर्भरः । मन्त्रिणश्चाधिकारं च रामांशाय ददौ मुदा ।।
स्वकीयं लक्षसैन्यं च तत्पतिश्चोदयः कृतः ।।६४
ततः पञ्चदिनान्ते तु महीराजस्समागतः । रुरोध नगरीं सर्वां चामुण्डबलदर्पितः ।।
तयोश्चासीन्महद्युद्धं मासमात्रं भयानकम् ।।६५
प्रभाते विमले जाते कृष्णांशो लक्षसैन्यपः । चामुण्डान्तमुपागम्य सहस्रं स्वाङ्गसम्भवम् ।।
चिच्छेद च शिरस्तेषां चामुण्डानां पृथक्पृथक् ।।६६
छिन्ने शिरसि ते सर्वे लक्षवीरा बभूविरे । तदा तद्व्याकुलं सैन्यं चामुण्डैस्तैः प्रपीडितम् ।।६७
विस्मितश्चैव कृष्णांशो भयभीतस्तदा मुने । तुष्टाव शारदां देवीं सर्वमङ्गलकारिणीम् ।।६८

---

भल्लास्त्र द्वारा प्रहार किया । उस समय वह रक्तबीज सहस्र की संख्या में दिखाई देने लगा, जो खड्ग एवं शक्ति आदि अस्त्रों से सुसज्जित होकर युद्ध में दुर्मदान्ध क्षत्रियों को ठहरो-ठहरो कहकर ललकार रहे थे । रक्तबीज के उन अनेक रूपों को देखकर आह्लाद (आल्हा) आदि वीरगण भयभीत होकर महाबली ब्रह्मानन्द के पास पहुँच गये । ब्रह्मानन्द ने उन्हें देखकर अपने पिता के पास जाकर उनसे लक्ष्मण

## कृष्णांश उवाच

नमस्ते शारदे मातर्ब्रह्मलोकनिवासिनि । त्वया ततमिदं विश्वं शब्दमात्रनिरन्तरम् ॥६९
रक्तबीजविनाशाय चामुण्डारूपधारिणी । नमस्ते दिव्यचामुण्डे पाहि मां शरणागतम् ॥७०
इति श्रुत्वा स्तवं देवी वरदा सर्वकारिणी । तस्य खड्गमुपागम्य रक्तबीजं ददाह वै ॥७१
भस्मीभूते लक्षरिपौ चामुण्डो भूमिमागतः । बबन्ध तं स कृष्णांशो ब्रह्मानन्दान्तिकं ययौ ॥७२
भूमिराजस्तु तच्छ्रुत्वा भयभीतः समागतः । तदा परिमलं भूपं दयालुं प्रेमविह्वलम् ॥
उवाच वचनं राजा क्षमस्व मम दुष्कृतम् ॥७३
महीपतेश्च वचनान्महद्भयमुपागतम् । अद्य प्रभृति भो वीर संत्यक्तः कलहः प्रियः ॥
भवांश्च मम सम्बन्धी वयं वै तव किङ्कराः ॥७४
इति श्रुत्वा परिमलो राजानमिदमब्रवीत् । रत्नभानोश्च तनयं लक्षणं नाम विश्रुतम् ॥
शरण्यं शरणं याहि विष्णुभक्तं दयापरम् ॥७५
इति श्रुत्वा भूमिराजो द्विजरूपधरो बली । साष्टाङ्गं दण्डवद् भूमौ लक्षणस्य चकार ह ॥७६
तदा तु लक्षणो वीरः कृत्वा स्नेहं नृपोपरि । सप्तलक्षबलैः सार्द्धं कान्यकुब्जमुपाययौ ॥७७
फाल्गुने मासि सम्प्राप्ते सर्वे स्वं स्वं गृहं ययुः ॥७८

---

**उदयसिंह बोले**—ब्रह्मलोक की निवासिनी उस मातृ शारदा को नमस्कार है, जिसने शब्द मात्र से निर्मित इस सम्पूर्ण विश्व को विस्तृत किया है। उस चामुण्डा देवी को मैं नमस्कार कर रहा हूँ, जिसने रक्तबीज के हननार्थ चामुण्डा का रूप धारण किया है। (देवी) मैं आपकी शरण में उपस्थित हूँ, मेरी

बलखानेर्गयाश्राद्धमचीकरदविप्लुतः । चैत्रमासि सिते पक्षे सम्प्राप्य निजमन्दिरे ॥
ब्राह्मणान्भोजयामास सहस्रं वेदतत्परान् ॥७९

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयो नाम सप्तविंशोऽध्यायः ।२७

# अथाष्टाविंशोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

अष्टाविंशाब्दके प्राप्ते कृष्णांशे बलवत्तरे । कार्तिक्यामिन्दुवारे च कृत्तिकाव्यतिपातभे ॥१
कृष्णांशोऽयुतसेनाढ्यः स्वर्णवत्या समन्वितः । विवाहमुकुटस्यैव सन्त्यागाय ययौ मुदा ॥२
पवित्रमुत्पलारण्यं वाल्मीकिमुनिसेवितम् । गङ्गाकूले ब्रह्ममयं लोहकीलकमुत्तमम् ॥३
तत्र गत्वा स शुद्धात्मा पुष्पवत्या समन्वितः । गोसहस्रं च विप्रेभ्यो ददौ स्नाने प्रसन्नधीः ॥४
एतस्मिन्नन्तरे प्राप्ता म्लेच्छजातिसमुद्भवा । शोभा नाम महारम्या वेश्या परमसुन्दरी ॥५
सा ददर्श परं रम्यं कृष्णांशं पुरुषोत्तमम् । तद्दृष्टिमोहमापन्ना व्याकुला चाभवत्क्षणात् ॥६
मूर्च्छितां तां समालोक्य कृष्णांशः सर्वमोहनः । स्वनिवासमुपागम्य विप्रानाहूय पृष्टवान् ॥७

---

घर चले गये । इन लोगों ने चैत्रमास के आरम्भ में बलखानि (मलखान) के निमित्त गयाश्राद्ध करके उसके शुक्लपक्ष में अपने घर पहुँचकर सहस्र वैदिक ब्राह्मणों को भोजन कराया ।६९-७९

श्री भविष्यमहापुराण के प्रतिसर्गपर्वपर्व में कलियुगीय इतिहाससमुच्चय वर्णन

अष्टादशपुराणानि केन प्रोक्तानि किं फलम् । ब्रूत मे विदुषां श्रेष्ठा वेदशास्त्रपरायणाः ॥८
इति श्रुत्वा वचो रम्यं विद्वांसः शास्त्रकोविदाः । अब्रुवन्वचनं रम्यं कृष्णांशं सर्वधर्मगम् ॥९
पराशरेण रचितं पुराणं विष्णुदैवतम् । शिवेन रचितं स्कान्दं पाद्मं ब्रह्ममुखोद्भवम् ॥१०
शुकप्रोक्तं भागवतं ब्राह्मं वै ब्रह्मणा कृतम् । गारुडं हरिणा प्रोक्तं षड् वै सात्त्विकसम्भवाः ॥११
मत्स्यः कूर्मो नृसिंहश्च वामनः शिव एव च । वायुरेतत्पुराणानि व्यासेन रचितानि वै ॥१२
राजसाः षट् स्मृता वीर कर्मकाण्डमया भुवि । मार्कण्डेयं च वाराहं मार्कण्डेयेन निर्मितम् ॥१३
आग्नेयमङ्गिराश्चैव जनयामास चोत्तमम् । लिङ्गब्रह्माण्डके चापि तण्डिना रचिते शुभे ॥
महादेवेन लोकार्थे भविष्यं रचितं शुभम् ॥१४
तामसाः षट् स्मृताः प्राज्ञैः शक्तिधर्मपरायणाः । सर्वेषां च पुराणानां श्रेष्ठं भागवतं स्मृतम् ॥१५
घोरे भुवि कलौ प्राप्ते विक्रमो नाम भूपतिः । कैलासाद्भुवमागत्य मुनीन्सर्वान्समाह्वयत् ॥१६
तदा ते मुनयस्सर्वे नैमिषारण्यवासिनः । सूतं सञ्चोदयामासुस्तेषां तच्छ्रवणाय च ॥
प्रोक्तान्युपपुराणानि सूतेनाष्टादशैव च ॥१७
इति श्रुत्वा तु वचनं कृष्णांशो धर्मतत्परः । श्रुत्वा भागवतं शास्त्रं सप्तेऽह्नि महोत्तमम् ॥१८
ददौ दानानि विप्रेभ्यो गोसुवर्णमयानि च । ब्राह्मणान्भोजयामास सहस्रं वेदतत्परान् ॥१९
तदा तु भिक्षुकी भूत्वा शोभा नाम मदातुरा । मायां कृतवती प्राप्य कृष्णांशो यत्र वै स्थितः ॥२०
ध्यात्वा महामदं वीरं पैशाचं रुद्रकिङ्करम् । मायां सा जनयामास सर्वपाषाणकारिणीम् ॥२१

---

निवासस्थान पर पहुँचकर ब्राह्मणों को बुलवाकर उनसे प्रश्न किया—वेदशास्त्र पारायण करने वाले विद्वान् ब्राह्मण श्रेष्ठ ! अष्टादश पुराणों के रचयिता कौन हैं, और उसके श्रवण करने से किस फल की प्राप्ति होती है । इस उत्तमवाणी को सुनकर शास्त्र निपुण विद्वानों ने समस्त धर्म के ज्ञानी उन उदयसिंह

दृष्ट्वा स्वर्णवती देवी तां मायांशोभयोद्भवाम्। छित्त्वा चाह्लाद्य वामाङ्गीं स्वगेहं गन्तुमुद्यता ॥२२
सा वेश्या तु शुचाविष्टा तस्याः शृङ्गारमुत्तमम्। स्वर्णयन्त्रस्थितं रम्यं लक्षद्रव्योपमूल्यकम् ॥
संहृत्य मायया धूर्ता देशं बाह्लीकमाययौ ॥२३
कल्पक्षेत्रमुपागम्य नेत्रसिंहसमुद्भवा। वेश्यया मम शृङ्गारं हृतं ज्ञात्वा सुदुःखिता ॥२४
कृष्णांशं वचनं प्राह गच्छ गच्छ महाबल। गृहीत्वा मम शृङ्गारं शीघ्रमागच्छ मां प्रति ॥२५
गुटिकेयं मया वीर रचिता तां मुखेन च। धूर्तमायाविनाशाय तव मङ्गलहेतवे ॥२६
इति श्रुत्वा तथा कृत्वा कृष्णांशस्सर्वमोहनः। शूकरक्षेत्रमागम्य तत्र वेश्यां ददर्श ह ॥२७
सा तु वेश्या च तं वीरं दृष्ट्वा कन्दर्पकारिणम्। रचयित्वा पुनर्मायां तदन्तिकमुपागता ॥२८
तदा सा निष्फलीभूय रुरोद करुणं बहु। रुदतीं तां समालोक्य दयालुस्स प्रसन्नधीः ॥२९
गृहीत्वा सर्वशृङ्गारं वचनं प्राह निर्भयः। किं रोदिषि महाभागे सत्यं कथय मा चिरम् ॥३०
साह मे सहरो नाम भ्राता प्राणसमप्रियः। नाट्यैश्च पञ्चसाहस्रैः सहितो मरणं गतः ॥३१
अतो रौमि महाभाग सम्प्राप्ता शरणं त्वयि। इत्युक्त्वा मायया धूर्ता कृत्वा शवमयान्त्यजान् ॥३२
तस्मै प्रदर्शयामास निजकार्यपरायणा। रुदित्वा च पुनस्तत्र प्राणांस्त्यक्तुं समुद्यता ॥३३
दयालुस्स च कृष्णांशस्तामाह करुणं वचः। कथं ते जीवयिष्यन्ति[1] शोभने कथयाशु मे ॥३४

---

वाली माया की रचना की। उसे देखकर देवी स्वर्णवती (सोना) ने जो आह्लाद की वामाङ्गी हैं, उसकी माया का विध्वंस करके घर के लिए प्रस्थान किया। उसी समय क्रुद्ध होकर उस वेश्या ने अपनी धूर्तमाया द्वारा स्वर्णवती (सोना) के उत्तम शृंगार का, जो स्वर्ण के सुरम्य यंत्र में स्थापित एवं एक लक्ष के मूल्य का था, अपहरण करके वाह्लीक देश को प्रस्थान कर दिया। कल्पक्षेत्र में पहुँचकर नेत्रसिंह की आत्मजा (सोना) ने यह जानकर कि 'उस वेश्या ने मेरे शृंगार का अपहरण कर लिया है, अत्यन्त दुःख प्रकट करती हुई उदयसिंह से कहा—महाबल ! जाओ-जाओ ! मेरे शृंगार लेकर मुझे शीघ्र मिलो वीर ! इस मेरे द्वारा रचित गुटिका को मुख में धारण करने से उसकी धूर्त माया विनष्ट हो जायेगी। आपकी

साह वीर तवास्ये तु संस्थिता गुटिका शुभा । देहि मे कृपया वीर जीवयिष्यन्ति ते तया ॥३५
इत्युक्तस्तु तया वीरो ददौ तस्यै च तद्वसु । तदा प्रसन्ना सा धूर्ता कृत्वा शुकमयं वपुः ॥
पञ्जरस्थमुपादाय कृष्णांशं कामविह्वला ॥३६
वाह्लीकदेशमागम्य सारठनगरं शुभम् । उवास च स्वयं गेहे कृत्वा दिव्यमयं वपुः ॥३७
निशीथे समनुप्राप्ते कृत्वा तं नररूपिणम् । आलिलिङ्ग हि कामार्ता कृष्णांशं धर्मकोविदम् ॥३८
दृष्ट्वा तां स तथाभूतां कृष्णांशो जगदम्बिकाम् । तुष्टाव मनसा धीरो रात्रिसूक्तेन नम्रधीः ॥३९
तदा सा स्वेडिनी भूत्वा त्यक्त्वा कृष्णांशमुत्तमम् । पुनः शुकमयं कृत्वा चिञ्चिणीवृक्षमारुहत् ॥४०
तदा स्वर्णवती देवी बोधिता विष्णुमायया । कृत्वा श्येनीमयं रूपं तत्र गत्वा मुदान्विता ॥४१
ददर्श शुकभूतं च कृष्णांशं योगतत्परम् । एतस्मिन्नन्तरे वेश्या पुनः कृत्वा शुभं वपुः ॥
नरभूपं च कृष्णांशं वचनं प्राह नम्रधीः ॥४२
अये प्राणप्रिय स्वामिन्भज मां कामविह्वलाम् । पाहि मां रतिदानेन धर्मज्ञोऽसि भवान्सदा ॥४३
इत्युक्तस्स तु तामाह वचनं शृणु शोभने । ते आर्यवर्त्मस्थितोऽहं वै वेदमार्गपरायणः ॥४४
विवाहितां शुभां नारीं यो भजेत् ऋतौ न हि । स पापी नरकं याति तिर्य्यग्योनिमयं स्मृतम् ॥
अतः परस्त्रिया भोगो ज्ञेयो वै निरयप्रदः ॥४५
इति श्रुत्वा तु सा प्राह विश्वामित्रेण धीमता । शृङ्गिणा च महाप्राज्ञ वेश्यासङ्गः कृतः पुरा ॥

---

में स्थित गुटिका द्वारा ही वे सब जीवनदान प्राप्त कर सकेंगे। अतः उसे मुझे देने की कृपा कीजिये। उसके इस प्रकार कहने पर उन्होंने वह गुटिका उसे दे दी। पश्चात् उस धूर्ता ने जो कामपीड़ित हो रही थी प्रसन्न होकर उन्हें शुक (तोता) बनाकर पिंजरे में रखकर अपने वाहीक देश के नगर को प्रस्थान किया। वहाँ अपने घर पहुँचने पर आधीरात के समय मनुष्य रूप में उनके दिव्य शरीर को पूर्ववत्

**न कोऽपि नरकं प्राप्तस्तस्मान्मां भज कामिनीम्		॥४६**
**पुनश्चाह स कृष्णांशः कृतं पापं तपोबलात् । ताभ्यां च मुनियुग्माभ्यामसमर्थो हि साम्प्रतम् ॥४७**
**अर्द्धाङ्गं पुरुषस्य स्त्री मैथुने च विशेषतः । अहमार्यश्च भवती वेश्या च बहुभोगिनी ॥४८**
**ऋषिशब्दश्च पूर्वास्याज्जात ऋग्जस्सनातनः । योगजश्चैव यः शब्दो दक्षिणास्याद्यजुर्भवः ॥४९**
**तद्धितान्तश्च यश्शब्दः पश्चिमास्याच्च सामजः । छन्दोभूताश्च ये शब्दास्सर्वे ब्राह्मणप्रियाः ॥**
**केवलो वर्णमात्रश्च स शब्दोऽथर्वजःस्मृतः		॥५०**
**पञ्चमास्याच्च ये जाताः शब्दाः संसारकारिणः । ते सर्वे प्राकृता ज्ञेयाश्चतुर्लक्षविभेदिनः ॥५१**
**हित्वा तान्यो हि शुद्धात्मा चतुर्वेदपरायणः । स वै भवाटवीं त्यक्त्वा पदं गच्छत्यनामयम् ॥५२**
**न वदेद्यावनीं भाषां प्राणैः कण्ठगतैरपि । गजैरापीड्यमानोऽपि न गच्छेज्जैनमन्दिरम् ॥५३**
**इत्येवं स्मृतिवाक्यानि मुनिना पठितानि वै । कथं त्याज्यो मया धर्मस्वर्गलोकसुखप्रदः ॥५४**
**इति श्रुत्वा तु सा वेश्या म्लेच्छायाश्चांशसम्भवा । शोभना नाम रम्भोरूर्महाक्रोधमुपाययौ ॥५५**
**वेतसैस्ताडयित्वा तां पुनः कृत्वा शुकं स्वयम् । न ददौ भोजनं तस्मै फलाहारं शुकाय वै ॥५६**
**तदा स्वर्णवती देवी कृत्वा नारीमयं वपुः । मशकीकृत्य तं वीरं तत्रैवान्तर्दधे तु सा ॥५७**
**पुनः श्येनीवपुः कृत्वा तद्देशाद्यातुमुद्यता । पृष्ठमारोप्य मशकं मयूरनगरं ययौ ॥५८**

---

आलिङ्गन करना स्वीकार कीजिये । इसे सुनकर उदयसिंह ने पुनः प्रत्युत्तर दिया—वे दोनों महर्षि प्रवर महान् तपस्वी थे, अपने तपोबल द्वारा उन्होंने वैसा किया था । परन्तु इस समय मैं ऐसा करने में असमर्थ हूँ । पुरुष का अर्द्धांग उसकी स्त्री है, विशेषकर मैथुनकर्म के लिए । इसलिए मैं आर्यपुरुष हूँ और तुम अनेकों के उपभोग करने वाली वेश्या हो, दोनों का साथ होना सर्वथा असम्भव है । क्योंकि पूर्व मुख से

मकरन्दस्तु तां दृष्ट्वा कृष्णांशेन समन्विताम् । नेत्रपालस्य तनयां नाम्ना स्वर्णवतीं बली ॥
चरणावुपसङ्गृह्य स्वगेहे तामवासयत् ॥५९
शोभनापि च सम्बुध्य पञ्जरान्तमुपस्थिता । न ददर्श शुकं रम्यं मूर्छिता चापतद्भुवि ॥६०
किं करोमि क्व गच्छामि विना तं रमणं परम् । इत्येव बहुधालप्य मदहीनपुरं ययौ ॥६१
तत्र स्थितं च पैशाचं मायामदविशारदम् । महामदं च सम्पूज्य स्वदेहं त्यक्तुमुद्यता ॥६२
महामदस्तु सन्तुष्टो गत्वा वै शिवमन्दिरम् । मरुस्थलेश्वरं लिङ्गं तुष्टावार्षभभाषया ॥६३
तदा प्रसन्नो भगवान्वचनं प्राह सेवकम् । स्वर्णवत्या हृतो वीरः कृष्णांशश्चार्यधर्मगः ॥
मया सह समागच्छ मयूरनगरं प्रति ॥६४
इत्युक्तस्तेन पैशाचो नटैः पञ्चसहस्रकैः । तया सह ययौ तूर्णं सहुरेणं समन्वितः ॥६५
इन्दुलश्च तथाह्लादो बोधितो विष्णुमायया । त्रिलक्षबलसंयुक्तो देवसिंहेन संयुतः ॥
मयूरनगरं प्राप्य मकरन्दमुपाययौ ॥६६
तदा तु शोभना वेश्या सहुरेण बलैस्सह । चकार भैरवीं मायां सर्वशत्रुभयङ्करीम् ॥६७
सर्वतश्चोत्थितो वातो महामेघसमन्वितः । पतन्ति बहुधा चोल्काः शर्करावर्षणे रताः ॥६८
दृष्ट्वा तां भैरवीं मायां तमोभूतां समन्ततः । मकरन्दश्च बलवान्रथस्थः स्वयमाययौ ॥६९

---

लिया कि उदयसिंह के समेत यह नेत्रसिंह की स्वर्णवती (सोना) नामक कन्या हैं, सादर उसके चरण का स्पर्श किया और अपने महल में निवास कराया । पिंजडे के पास जाकर उसे शून्य देखकर शोभना मूर्च्छित होकर पृथ्वी पर गिर पड़ी । पश्चात् चेतना प्राप्त होने पर रुदन करने लगी—'मैं उस रमण उदयसिंह के बिना अब क्या करूँ, कहाँ जाऊँ । इस प्रकार अनेक भाँति से विलाप करने के उपरांत वह मदहीनपुर चली

शनिभल्लेन तां मायां भस्म कृत्वा महाबलः । गृहीत्वा सहुरं धूर्तं सबलं गेहमाप्तवान् ॥७०
तदा तु शोभना नारी काममायां चकार ह । बहुलास्संस्थिता वेश्या गीतनृत्यविशारदाः ॥७१
मोहिताः क्षत्रियाः सर्वे मुमुहुर्लास्यदर्शनात् । देवसिंहाच्च कृष्णांशाद्दृते ते जडतां गताः ॥७२
तदा स्वर्णवती देवी कामाक्षी ध्यानतत्परा । पुनरुत्थाप्यतान्सर्वान्गृहीत्वा शोभनां पुनः ॥
मयूरध्वजमागम्य निगडैस्तान्बबन्ध ह ॥७३
महामदस्तु तज्ज्ञात्वा रुद्रध्यानपरायणः । चकार शाम्बरीं मायां नानासत्त्वविधायिनीम् ॥७४
व्याघ्राः सिंहा वराहाश्च वानरा दंशकाः नराः । सर्पा गृध्रास्तथा काका भक्षयन्ति समन्ततः ॥७५
तदा स्वर्णवती देवी कामाक्षी ध्यानतत्परा । ससर्ज स्मरजां मायां तन्मायाध्वंसिनीं रणे ॥७६
तया तार्क्ष्यास्समुत्पन्नाः शरभाश्च महाबलाः । सिंहादीन्भक्षयामासुर्जघ्नुश्चैव सहस्रशः ॥७७
हाहाभूते च तत्सैन्ये दिक्षु विद्राविते सति । शोभना चाभवद्दासी स्वर्णवत्याश्च मायिनी ॥७८
सहुरस्तैर्नटैस्सार्द्धं चाह्लादेनैव चूर्णितः । तेषां रुधिरकुंभाश्च भूमिमध्ये समारुहन् ॥७९
एवं च मुनिशार्दूल चतुर्मास्स्वभवद्रणः । वैशाखे मासि संप्राप्ते ते वीरा गेहमाययुः ॥
इति ते कथितं विप्र चान्यत्किं श्रोतुमिच्छसि ॥८०

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयेऽष्टाविंशोऽध्यायः ।२८

---

नामक अस्त्र द्वारा उस माया को नष्ट करके उस सबल एवं धूर्त सहुर को पकड़कर अपने गृह को आगमन किया । उस समय शोभना वेश्या ने अपनी काम-माया की रचना की उसमें नृत्य-गान में अत्यन्त निपुण अनेक वेश्याओं का जमाव था, सबको लुभाने के लिए वे नृत्य-गान कर रही थीं । उस नृत्य को देखकर देवसिंह और उदयसिंह के अतिरिक्त

# अथैकोनत्रिंशोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### ऋषय ऊचुः

किन्नरी नाम या कन्या त्वया प्रोक्ता महामुने । कुत्र स्थाने कथं जाता तत्सर्वं कृपया वद ॥१

### सूत उवाच

पुरा चैत्ररथे देशे नानाजननिषेविते । वसन्तसमये प्राप्ते क्रीडन्त्यत्र दिवौकसः ॥२
मञ्जुघोषा च स्वर्वेश्या शुकस्थाने समागता । दृष्ट्वा तं सुन्दरं बालं मोहनाय समुद्यता ॥३
गीतनृत्यादिरागांश्च कृत्वा सा कामविह्वला । प्राञ्जलिं प्रणता बद्ध्वा पुनस्तुष्टाव तं मुनिम् ॥४
तदा शुकस्तु भगवान्पद्यं स्तुतिमयं शुभम् । श्रुत्वा प्रसन्नहृदयो वरं ब्रूहीति सोऽब्रवीत् ॥५
सा तु श्रुत्वा शुभं वाक्यं प्रोवाच श्लक्ष्णया गिरा । पतिर्मे भव हे नाथ शरणागतवत्सल ॥६
इति श्रुत्वा तु वचनं तथा कृत्वा तया सह । स रेमे मुनिशार्दूलः शुको विज्ञानकोविदः ॥७
तयोस्सकाशात्सञ्जज्ञे मुनिर्नाम सुतोऽनयोः । तपश्चकार बलवान्द्वादशाब्दं प्रयत्नतः ॥८
तस्मै ददौ तदा पत्नीं स्वर्णदेवस्य वै सुताम् । कुबेरो रुद्रसहितः स मुनिस्तु मुदान्वितः ॥९
तया रेमे प्रसन्नात्मा तयोर्जाता सुतोत्तमा । किन्नरी नाम विख्याता हिमतुङ्गे समुद्भवा ॥

---

# अध्याय २९

## कलियुगीय इतिहाससमुच्चय का वर्णन

तपश्चकार सा देवी रूपयौवनशालिनी ॥१०
तदा प्रसन्नो भगवाञ्छङ्करो लोकशङ्करः । मकरन्दाय धीराय ददौ तां रुचिराननाम् ॥११
मुनिस्तु शङ्करं प्राह देवदेव नमोऽस्तुते । मत्सुतायै वरं देहि राष्ट्रवर्धनमुत्तमम् ॥१२
इति श्रुत्वा शिवः प्राह गुरुण्डान्ते च भूतले । मध्यदेशे च ते राष्ट्रं भविष्यति सुखप्रदम् ॥
त्रिंशदब्दप्रमाणेन तत्पश्चात्क्षयमेष्यति ॥१३
इति श्रुत्वा तु स मुनिर्हिमतुङ्गनिवासकः । मकरन्देन सहितस्तत्र वासमकारयत् ॥१४
इति ते कथितं विप्र पुनः शृणु कथां शुभाम् । ऊनत्रिंशाब्दकं प्राप्ते कृष्णांशे रणकारणम् ॥१५
नेत्रपालस्य नगरं नानाधातुविचित्रितम् । मत्वा न्यूनपतिर्बौद्धो रुरोध नगरं शुभम् ॥१६
सप्तलक्षयुतो राजा बौद्धसिंहो महाबलः । त्रिलक्षबलसंयुक्तैस्तैस्सार्द्धं युद्धमचीकरत् ॥१७
सप्ताहोरात्रमभवत्सेनायुद्धं भयानकम् । योगसिंहो भोगसिंहो विजयश्च महाबलः ॥१८
जघान शात्रवीं सेनां बौद्धसिंहेन पालिताम् । एतस्मिन्नन्तरे प्राप्ताः श्यामजापकदेशगाः ॥१९
बौद्धा मायाविनस्सर्वे लोकमान्यप्रपूजकाः । पुनर्जातं महद्युद्धं मासमेकं तयोस्तदा ॥२०
नेत्रापालाज्ञया सर्वे कृष्णांशाद्याः समागताः । कृष्णांशो बिन्दुलारूढो देवः स्वहयसंस्थितः ॥२१
इन्दुलश्च करालाश्वे मण्डलीको गजे स्थितः । गौतमश्च समायातो हरिनागरसंस्थितः ॥२२
तालनश्च समायातः सिंहिन्युपरि संस्थितः । धान्यपालस्तैल्यकारो युयुत्सोरंशसम्भवः ॥२३

---

नाम से ख्यातिप्राप्त एक कन्या रत्न की उत्पत्ति हुई । रूप-यौवन सम्पन्न होने पर वह बाला तप करने लगी । जिससे लोक के कल्याण करने वाले भगवान् शिव ने उस सौन्दर्य पूर्ण एवं कल्याणमुखी कन्या को धीर-गम्भीर राजा मकरन्द को सौंप दिया । उसी बीच मुनि ने शंकर जी से प्रार्थना की—देवाधिदेव आपको नमस्कार है । आप मेरी कन्या के लिए वर और मुझे एक समृद्ध राष्ट्र प्रदान करने की कृपा

लल्लसिंहश्च बलवान्कुन्तिभोजांशसंभवः । ताम्बूलपकजातीयो लक्षणानुज्ञया ययौ ॥२४
तदा तु नेत्रसिंहश्च सप्तलक्षबलैर्वृतः । पालितश्चाष्टभिर्वीरैस्तेषां नाशाय चाययौ ॥२५
भयभीताश्च ते बौद्धास्त्यक्त्वा देशं समन्ततः । चीनदेशमुपागम्य युद्धभूमिमकारयन् ॥२६
तदनुप्रययुस्ते वै हूहानदमुपस्थिताः । माघमासे तु सम्प्राप्ते पुनर्युद्धमवर्तत ॥२७
श्यामदेशोद्भवा लक्षं तथा लक्षं च जापकाः । दश लक्षाश्चीनदेश्या युद्धाय समुपस्थिताः ॥२८
कृष्णांशो लक्षसेनाढ्यो देवो लक्षसमन्वितः । नेत्रपालश्च लक्षाढ्यो योगभोगसमन्वितः ॥२९
मण्डलीकश्चेन्दुलेन लक्षसैन्यसमन्वितः । ध्यानपालो लल्लसिंहो लक्षसैन्यान्वितः स्थितः ॥३०
जननायक एवापि लक्षसैन्ययुतः स्थितः । तालनो लक्षसेनाढ्यो युद्धाय समुपागतः ॥३१
तत्र युद्धमभूद्घोरं बौद्धानामार्यकैस्सह । पक्षमात्रं मुनिश्रेष्ठ यमलोकविवर्द्धनम् ॥३२
सप्तलक्षं हता बौद्धा द्विलक्षं चार्यदेशजाः । ततस्ते भयभीताश्च त्यक्त्वा युद्धं गृहं ययुः ॥३३
कृत्वा दारुमयीं सेनां कलयन्त्रप्रभावतः । गजाश्च दशसाहस्राः सशूराः काष्ठनिर्मिताः ॥३४
एकलक्षं हयारूढा दारुपाश्च रणोन्मुखाः । सहस्रं महिषारूढास्सहस्रं कोलपृष्ठगाः ॥३५
सिंहारुढास्सहस्रं च सहस्रं हंसवाहनाः । कङ्कगोमायुगृध्राणां श्यामारूढाः पृथक्तथा ॥३६
उष्ट्राः सप्तसहस्राणि सशूराश्च रणोन्मुखाः । एवं सपादलक्षैश्च काष्ठसैन्यैश्च मानुषाः ॥३७
द्विलक्षाणि क्षयं जग्मुः कृष्णांशाद्यैः सुरक्षिताः । ततो हाहाकृतं सैन्यं चार्य्याणां च ननाश तत् ॥३८
दृष्ट्वा तत्कौतुकं रम्यं जयन्तो युद्धकोविदः । आग्नेयं शरमादाय काष्ठसैन्येषु चाक्षिपत् ॥३९

---

के अंश से उत्पन्न लल्लसिंह तथा लक्षण (लाखन) की आज्ञा से वह तमोली भी साथ आया था। उस समय राजा नेत्रसिंह ने अपने सात लाख सैनिकों द्वारा जो उनके आत्मीय आठ वीरों की अध्यक्षता में सुरक्षित थे, बौद्धों के विनाशार्थ प्रस्थान कर दिया किन्तु उनसे भयभीत होकर उन बौद्धों ने इस देश का

भस्मीभूताश्च ते सर्वे तत्रैव विलयं गताः । त्रिलक्षं क्षत्रियाः शेषा जयन्तं रणकोविदम् ॥
चक्रुर्जयरवं तत्र तुष्टुवुश्च पुनः पुनः ॥४०
तदा तु चीनजा बौद्धाः कृत्वा विंशत्सहस्रकान् । हयारूढाँल्लोहमयान्प्रेषयामासुरूर्जितान् ॥४१
योगसिंहो गजारूढो धनुर्बाणधरो बली । कण्ठेषु लोहजान्वीरांस्ताडयामास वै तदा ॥४२
मृतास्ते पञ्चसाहस्रा योगसिंहशरार्दिताः । बौद्धसिंहस्तदा शूरो दृष्ट्वा तस्य पराक्रमम् ॥
कृत्वा लोहमयं सिंहं योगसिंहमपेषयत् ॥४३
पातेन तस्य सिंहस्य स वीरो मरणं गतः । तदा तु भोगसिंहश्च हयारूढो जगाम ह ॥
स्वभल्लेन च तं सिंहं हत्वा तत्र जगर्ज वै ॥४४
तदा तु बौद्धसिंहेन शार्दूलस्तत्र चोदितः । सहयो भोगसिंहश्च तेनैव मरणं गतः ॥४५
मातुलौ मृत्युवशगौ दृष्ट्वा स्वर्णवतीसुतः । करालं हयमारुह्य बौद्धसिंहमुपाययौ ॥४६
शरमादाय वै शीघ्रं नाम्ना सम्मोहनं शुभम् । मोहयित्वा रिपुबलं बौद्धसिंहसमन्वितम् ॥४७
बद्ध्वा तान्बौद्धसिंहादीन्नृपान्दशसहस्रकम् । कलयन्त्रं च सञ्चूर्ण्य कृष्णांशांतिकमाययौ ॥४८
तदा ते हर्षितास्सर्वे प्रपेष्य नगरं ययुः । तद्वेश्म योजनायामं सर्वसम्पत्समन्वितम् ॥
लुण्ठयित्वा बलात्सर्वे नृपदुर्गमुपाययुः ॥४९
बौद्धसिंहस्तदागत्य जयन्तेन विमोचितः । सुतां स्वां पद्मजां नाम्ना जयन्ताय ददौ मुदा ॥५०
दशकोटीः सुवर्णस्य चाह्लादाय तदा धनम् । सर्वैश्च बौद्धवृन्दैश्च तत्रैव शपथः कृतः ॥५१

---

कर दिया । पश्चात् शेष तीन लाख क्षत्रिय सैनिकों ने रण पंडित इंदुल को अपने जय जयकार के सिंहनाद द्वारा संतुष्ट किया । उस समय चीन निवासी बौद्धों ने लोहनिर्मित बीस सहस्र वाहन समेत सैनिकों को पुनः उस युद्धस्थल में भेजा । उन्हें देखकर हाथीपर बैठे हुए योगसिंह ने अपने वाणों द्वारा उन वीरों को

आर्यदेशं न यास्यामः कदाचिद्राष्ट्रहेतवे । इत्युक्त्वा तान्प्रणम्याशु सम्प्रस्थानमकारयन् ॥
त्रिलक्षैश्च युतास्ते वै नेत्रपालगृहं गताः ॥५२

### ऋषय ऊचुः

इन्दुलेन कथं सूत तत्र प्राणीकृता न हि । सुप्रिया योगसिंहाद्यास्तन्नो वद विचक्षण ॥५३

### सूत उवाच

आगता यमलोकाद्वै कतिचित्प्राणिनो भुवि । तदा तु दुःखितो देवो महेन्द्रान्तमुपाययौ ॥५४
देवराज नमस्तुभ्यं सर्वदेवप्रियङ्कर । जयन्तो जगतीं प्राप्य मृताञ्जीवयति स्वयम् ॥
अतो वै लोकमर्यादा विरुद्धा दृश्यते भुवि ॥५५
इति श्रुत्वा तु वचनं महेन्द्रो देवमायया । वडवामृतमाहृत्य तथा वै स्वर्गगां गतिम् ॥
जयन्तस्य स्वपुत्रस्य मुमोद स सुरैः सह ॥५६
इन्दुलश्च तदा दुःखी शारदां सर्वमङ्गलाम् । पूजयित्वा विधानेन योगध्यानपरोऽभवत् ॥५७
इति ते कथितं विप्र पुनः शृणु कथां शुभाम् । नेत्रपालश्च बलवान्बहुपुत्रः शुचान्वितः ॥
दशकोटिमितं स्वर्णं तेभ्यो दत्त्वा समं समम् ॥५८
प्रस्थानं कारयामास चाष्टानां बलशालिनाम् । ते वै द्विलक्षसैन्याढ्याः स्वगेहाय ययुर्मुदा ॥५९

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयो नाम एकोनत्रिंशोऽध्यायः ।२९

---

शपथ भी की— 'कि राज्य की लिप्सा से हम लोग आर्य प्रदेश में कभी भी यात्रा नहीं करेंगे।' इसके उपरांत उन्हें प्रणामकर वहाँ से प्रस्थान किया। और नेत्रपाल भी अपने तीन लाख सैनिकों समेत घर

# अथ त्रिंशोऽध्यायः

## कलियुगीय इतिहाससमुच्चयवर्णनम्

### सूत उवाच

यदा ते चीनदेशस्थास्तदाहूतो नृपेण वै । कामपालेन भो विप्र लक्षणो नकुलांशकः ॥१
जयचन्द्र महाभाग सावधानं वचः शृणु । वैशाखशुक्लसप्तम्यां मुहूर्तोऽयं दिनागमे ॥२
अतो वै लक्षणो वीरश्चैकाकी मां समाप्नुयात् । गृहीत्वा मत्सुतां दोलां गमिष्यति तवान्तिकम् ॥३
सेनान्वितं च तं ज्ञात्वा महीराजो महाबलः । ग्रहीष्यति पराजित्य तस्माद्योग्यं वचो मम ॥४
इति तत्रत्यवचनं मत्वा राजा प्रसन्नधीः । लक्षणं हस्तिनीसंस्थं शतशूरसमन्वितम् ॥५
आहूय प्रेषयामास कामपालाय धीमते । मार्गे पञ्चदिनं वीर उषित्वा तद्गृहं ययौ ॥६
तदा पद्माकरः श्यालो ज्ञात्वा लक्षणमागतम् । भूमिराजं समाहूय तेन युद्धमचीकरत् ॥७
लक्षणो नकुलांशश्च दृष्ट्वा शत्रुमुपस्थितम् । स्वशरैस्तर्पयामास राजराजं महाबलम् ॥८
मूर्च्छयित्वा महीराजं हत्वा पञ्चशतं बली । कामपालं समागम्य नत्वा वासमकारयत् ॥९
उत्थितश्च महीराजो गत्वा पद्माकरं प्रति । वचनं प्राह कार्यार्थी शृणु मित्र वचो मम ॥१०

---

# अध्याय ३०

## कलियुगीयेतिहाससमुच्चय का वर्णन

**सूत जी बोले**—विप्र ! जिस समय उदयसिंह आदि वीरगण चीन देश गये हुए थे, उस समय राजा कामपाल ने नकुल के अंश से उत्पन्न लक्षण (लाखन) को अपने यहाँ बुलवाया । पत्र में उसने लिखा

लक्षणो मे महान्छत्रुस्स च त्वद्गेहमागत: । यदि दास्यसि तं बद्ध्वा त्वां मदङ्गं करोम्यहम् ।।११
इति श्रुत्वा स लोभात्मा दत्त्वा हालाहलं विषम् । बद्ध्वा तं लक्षणं वीरं महीराजाय चार्पयत् ।।
हत्वा तान्छतशूरांश्च गुप्तवार्तामकारयन् ।।१२
ज्ञात्वा तत्पद्मिनी नारी दु:खितालप्य वै भृशम् । चण्डिकां पूजयामास पतिमङ्गलहेतवे ।।१३
तदा प्रसन्ना सा देवी वरदा सर्वमङ्गला । आश्वास्य पद्मिनीं नारीं लक्षणान्तमुपाययौ ।।१४
स्वप्ने तमाह सा देवी ह्लीं फट् घेघे जपं कुरु । अस्य मन्त्रप्रभावाच्च सर्वविघ्न: प्रणश्यति ।।१५
स बुद्ध्वा लक्षणो वीरस्तं मन्त्रं च जजाप ह । आषाढे मासि सम्प्राप्ते कृष्णांशाद्या गृहं ययु: ।।१६
तालनश्च युतस्ताभ्यां[1] कान्यकुब्जमुपाययौ । न दृष्टो लक्षणो वीरो जयचन्द्रप्रियङ्कर: ।।
ज्ञात्वा तत्कारणं तैश्च कृतं योगमयं वपु: ।।१७
धान्यपाल: कांस्यधारी वीणाधारी च तालन: । लल्लसिंहो मृदङ्गाङ्को ययुस्ते वै महावतीम् ।।१८
सभां परिमलस्यैव गत्वा ते योगरूपिण: । चक्रुर्गानं मुदा युक्ता: सर्वे ते मोहमागता: ।।१९
प्रसन्नश्च तदा राजा मुक्तामालां स्वकण्ठगाम् । तालनाय ददौ प्रीत्या ताभ्यां स्वर्णाङ्गुलीयके ।।२०
तदा ते हर्षिता: सर्वे कृष्णांशं प्रति चाययु: । ज्ञात्वा कृष्णांश एवापि धृत्वा योगमयं वपु: ।।
ययौ बिन्दुगढं वीरस्तालनाद्यैस्समन्वित: ।।२१
हट्टमध्ये समागम्य कृत्वा रासोत्सवं शुभम् । गेहं पद्माकरस्यैव गत्वा ते ननृतुर्मुदा ।।२२
एतस्मिन्नन्तरे सर्वा योषितस्तत्र चागता: । वेणुवाद्यवृतं वीरं कृष्णांशं ददृशुर्मुहु: ।।
मोहितास्तस्य गानेन जडीभूता धनं ददु: ।।२३

---

और वह इस समय तुम्हारे घर में उपस्थित है । यदि उसे बाँधकर मुझे सौंप दो तो मैं तुम्हें अपना पद (प्रतिनिधि) प्रदान कर दूँगा । इस लोभ में आकर पद्माकर ने लक्षण (लाखन) को हलाहल विष देकर

**तदा तु पद्मिनी नारी सर्वलक्षणसंयुता । ज्ञात्वा कृष्णांशमेवापि रुरोद चिरमातुरा ।।२४**
**उवाच च विलप्याशु मत्पतिर्लक्षणो बली । महीराजेन शूरेण कारागारे बलात्कृतः ।।**
**अहं योषा भवान्योगी कथं कार्यं भविष्यति ।।२५**
**इति श्रुत्वा तु स नृपो भुजमुत्थाप्य सत्वरम् । आश्वास्य पद्मिनीं नारी ययुस्ते देहलीं प्रति ।।**
**राजद्वारमुपागम्य कृष्णांशस्स ननर्त ह ।।२६**
**महीराजस्तु बलवान्प्रसन्नस्तस्य लीलया। वाञ्छितं ब्रूहि कृष्णांश सर्वं योगिन्ददाम्यहम् ।।२७**
**इति श्रुत्वा भूपवचो विहस्योवाच तं प्रति । कारागारं लोहमयं नृपयोग्यं च मे नृप ।।**
**दर्शयाशु स्वकीयं वै भवान्भूपशिरोमणिः ।।२८**
**इति श्रुत्वा स नृपतिर्मोहितः कृष्णलीलया । दर्शयित्वा च वै शीघ्रं पुनस्तेभ्यो ददौ धनम् ।।२९**
**ततस्ते योगिनस्सर्वे सम्प्राप्य च महावतीम् । नत्वा परिमलं भूपं गदित्वा सर्वकारणम् ।।३०**
**स्वसेनां सज्जयामास चाह्लादश्च नृपाज्ञया । पञ्चलक्षं महावत्या हयारूढास्समास्थिताः ।।३१**
**तालनस्सप्तलक्षाणि सैन्यान्याहूय चागतः । एवं द्वादशलक्षाणि क्षत्रिया रणदुर्मदाः ।।**

---

सुवर्ण की अंगूठी प्रदान किया । उस सम्मान से वे हर्षित होकर उदयसिंह के पास पहुँचे । वीर उदयसिंह ने अपने समाज वालों को अत्यन्त निपुण जानकर अपना योगमय वेष धारण किये तालन आदि के साथ बिंदुगढ़ को प्रस्थान किया । वहाँ पहुँचने पर उस नगर के बाजार में इन्होंने सर्वप्रथम सुन्दर रास लीला दिखाई । तदुपरांत पद्माकर के भवन में जाकर अत्यन्त प्रसन्न होकर नृत्य किया । उसी बीच वहाँ सभी स्त्रियाँ भी आ गई थी जो वंशी बजाने वाले उदयसिंह को ही बार-बार देख रही थी । उनके नृत्य-गान को सुनकर उन स्त्रियों के मोहित होकर जड़ की भाँति हो जाने पर सर्वलक्षण सम्पन्न रानी पद्मिनी ने 'उदयसिंह यही हैं, ऐसा निश्चित कर उनके सामने रुदन करती हुई करुण वचनों द्वारा उनसे कहा—'बली

देहलीं च समाजग्मुस्सर्वशस्त्रसमन्विताः ॥३२
एतस्मिन्नन्तरे मन्त्री चन्द्रभट्टो विशारदः । सर्वशास्त्रार्थकुशलो वैष्णवीशक्तिपूजकः ॥३३
महीराजं समागम्य वचः प्राह शृणुष्व भोः । मया वै च रहः क्रीडा दृष्टा देवीप्रसादतः ॥३४
तत्रोदयश्च कृष्णांशः पूर्णब्रह्माणमागमत् । वचः प्राह प्रसन्नात्मा शृणु त्वं सत्त्वविग्रह ॥३५
अग्निवंशविनाशाय चाद्य यास्यामि देहलीम् । हत्वाहं कौरवांशांश्च स्थापयित्वा कलिं भुवि ॥३६
पुनस्तवान्तिकं प्राप्य रहः क्रीडां करोम्यहम् । इत्युक्त्वा बिन्दुलारूढः स वीरस्त्वामुपस्थितः ॥
इत्यहं दृष्टवान्भूप कृष्णांशं योगनिद्रया ॥३७
इति तस्य वचः श्रुत्वा स भूपो विस्मयान्वितः । भयभीतः सहस्राणि शूरानाहूय सत्वरम् ॥
तेभ्यश्च लक्षणं दत्त्वा वचनं प्राह तान्प्रति ॥३८
पद्माकराय भूपाय गत्वा दत्त्वाशु लक्षणम् । ममान्तिकमुपागम्य कारणं वदताशु तत् ॥३९
इति श्रुत्वा तु ते सर्वे वह्निवंश्या महाबलाः । गत्वा तत्र तथा कृत्वा महीराजमुपागमन् ॥४०
भगदन्तश्च तेषां तु सहस्राणां च नायकः । महीराजं वचः प्राह शृणु तन्नृपभाषितम् ॥४१
पद्मिनी मे स्वसा राजन् गुप्तविद्याविशारदा । तया यज्ञपतिर्देवः सम्यगाराधितः पुरा ॥४२
दत्तस्तेन वरो रम्यो ह्यन्तर्धानमयः परः । सा तु तं लक्षणं कान्तमन्तर्धानं करिष्यति ॥
इति श्रुत्वा स नृपतिः परमानन्दमाप्तवान् ॥४३

---

सेना समेत जिसमें रण-दुर्धर्ष क्षत्रियगण सैनिक थे, अपने शस्त्रास्त्रों से सुसज्जित होकर उन लोगों ने दिल्ली को प्रस्थान किया । उसी बीच निपुण मंत्री चन्द्रभट्ट ने जो सभी शास्त्रों के मर्मज्ञ एवं वैष्णवी शक्ति के उपासक थे, पृथ्वीराज के पास पहुँचकर उनसे कहा—'देवी जी की प्रसन्नतावश मैंने 'एकान्त क्रीडा, का दर्शन किया है, जिसमें कृष्णांश उदयसिंह पूर्ण ब्रह्म के रूप में दिखाई दे रहे थे । उन्होंने प्रसन्न होकर कहा—शरीरधारी

एतस्मिन्नन्तरे प्राप्ताः कृष्णांशाद्या महाबलाः । रुरुधुर्देहलीं सर्वां महीराजेन पालिताम् ।।४४
स तदा पृथिवीराजो गृहीत्वा बहुभूषणम् । सर्वेभ्यश्च ददौ प्रेम्णा वचनं प्राह नम्रधीः ।।४५
लक्षणो नाम ते राजा कारागारे न वै मम । यदि मन्नगरे चास्ति तर्हि ते रोष ईदृशः ।।४६
इत्युक्त्वा तं च कृष्णांशं दर्शयामास वै गृहम् । महादेवस्य शपथं कृतवान्भूपतिर्भयात् ।।४७
तदोदयो भूपवचः सत्यं मत्वा सुदुःखितः । स्वकीयैः सह सम्प्राप्तो ग्रामं बिन्दुगढं शुभम् ।।४८
कामपालस्तु तच्छ्रुत्वा कृष्णांशागमनं बली । बलिं बहु गृहीत्वाशु कृष्णांशं शरणं ययौ ।।
प्राञ्जलिः प्रणतो भूत्वा वचनं प्राह भीरुकः ।।४९
सुता मे पद्मिनी नारी लक्षणेन समन्विता । न ज्ञात्वा क्व गताऽस्माभिस्सत्यं सत्यं ब्रवीम्यहम् ।।५०
इति तद्वचनं श्रुत्वा कृष्णांशः स्वबलैस्सह । कान्यकुब्जं समागत्य जयचन्द्रमुवाच ह ।।५१
भ्रातृजस्तव भूपाल पद्मिन्या लक्षणोऽन्वितः । कामपालगृहे नास्ति निश्चितो बहुधा मया ।।५२
न जाने क्व गतो राजा मम प्राणसमो भुवि । यदि भूप न पश्यामि सत्यं प्राणांस्त्यजाम्यहम् ।।५३
हा रत्नभानुतनय विष्णुभक्त शुभंकर । स्वमित्रं मां परित्यज्य कां दिशं गतावान्भवान् ।।
इत्युक्त्वा मूर्च्छितश्चासीत्कृष्णांशो वैष्णवप्रियः ।।५४
तदा स्वर्णवती देवी स्वदास्या शोभया सह । धृत्वा शुकमयं रूपं तत्रागत्य स्वमूर्तिगा ।।५५
तया सम्प्रेषिता शोभा म्लेच्छमायाविशारदा । जयचन्द्रमुपागम्य धृत्वा दिव्यमयं वपुः ।।५६
उवाच वचनं तत्र शृणु भूपशिरोमणे । मायाविनीं च मां विद्धि शोभनां नाम विश्रुताम् ।।५७

---

वीरों ने वहाँ पहुँचकर पृथिवीराज की राजधानी दिल्ली को चारों ओर से घेर लिया । उस समय पृथ्वीराज ने उन लोगों के पास पहुँचकर उन्हें अनेक भाँति के भूषण उपहार प्रदान करके नम्रता पूर्वक सप्रेम उनसे कहा—तुम्हारे राजा लक्षण (लाखन) मेरे जेल में नहीं हैं, यदि हमारे नगर में भी वे होते, तब आप को इस प्रकार का क्रोध करना उचित था । इतना कहकर उन्होंने उदयसिंह को वह (जेल) स्थान दिखा

दम्पती तव भूपाल संहृतौ येन यत्र वै । तत्राहं च गमिष्यामि महामदसमन्विता ॥५८
आह्लादश्चेन्दुलो वीरो देवो वै तालनो बली । कृष्णांशपालितास्सर्वे यास्यामो भूपते वयम् ॥५९
इत्युक्त्वा शोभना वेश्या कृत्वा योगमयं वपुः । महामदं समारुह्य पैशाचं रुद्रकिङ्करम् ॥
प्रययौ तान्पुरस्कृत्य योगिवेषान्महाबलान् ॥६०
आह्लादो गजसंस्थो वै करालरूढ इन्दुलः । तालनः सिंहिनीसंस्थो देवसिंहो मनोरथे ॥
कृष्णांशो बिन्दुलारूढो नर्तयामास तं हयम् ॥६१
कामरूपमयं देशं शतयोजनगामिनः । बलवन्तश्च सम्प्राप्ता गेहे गेहे जने जने ॥
लक्षणं शोधयामासुर्न प्राप्तास्तत्र तं नृपम् ॥६२
पुनर्मयूरनगरं शोभना तैः समन्विता । चिन्वती तं मनुष्येषु न प्राप्ता तत्र वै नृपम् ॥६३
पुनरग्निगढग्रामं शोभना च जने जने । लक्षणं मृगयामास न प्राप तत्र लक्षणम् ॥६४
गत्वा बाह्लीकनगरं शोभना तैस्समन्विता । लक्षणं च नृपश्रेष्ठं नापश्यत्तत्र दुःखिता ॥६५
पुनः स्वदेशमागम्य बाह्लीकं म्लेच्छवासिनम् । मर्कटेश्वरमीशानं तत्राह वनवासिनम् ॥
पूजयित्वा च सा वेश्या गाननृत्यपराभवत् ॥६६
स देवो भूमिमध्यात्तु समागम्यमुदान्वितः । कृष्णांशं प्रणतो भूत्वाऽब्रवीन्म्लेच्छप्रपूजितः ॥६७
अहं कालाग्निरुद्रेण भूमिगर्तेसुरोपितः। असमर्थ च मां विद्धि गच्छ वीर यथासुखम् ।६८
इति श्रुत्वा च सा शोभा निराशाभूत्तदा स्वयम् ॥६९
पुनः स्वर्णवतीं प्राप्य सर्वमेवादितोऽब्रवीत् । त्रिंशदब्दैश्च कृष्णांशे चैत्रशुक्ले समागते ॥७०

---

मायाविनी हूँ । आपके पुत्रवधू समेत पुत्र का अपहरण जिसने किया है, वहाँ महामद समेत मैं जा रही हूँ ।

तानाश्वास्य सुवर्णाङ्गि पूजयामास चण्डिकाम् । नवरात्रं गतं तस्या भोजनाच्छादनं विना ।।
निशीथान्ते तमः प्राप्ते गत्वाह जगदम्बिका ।।७१
पद्मिनी नाम या नारी मणिदेवस्य वै प्रिया । जाता सा कामपालस्य गृहे यज्ञावमानिता ।।७२
सेनापतिः कुबेरस्य मणिदेवो हि स स्मृतः । पूर्वं हि भीमसेनेन यक्षयुद्धेषु घातितः ।।७३
तदा तत्पद्मिनी नारी देवदेवमुमापतिम् । तुष्टाव च निराहारा मत्पतिं देहि शङ्कर ।।७४
शतवर्षान्ततरे देवो महादेव उवाच ताम् । कलौ विक्रमकाले हि शतद्वादशकेऽन्तिके ।।७५
नकुलांशं च सम्प्राप्य भुक्त्वा तेन महत्सुखम् । तद्वियोगेन सन्त्यज्य देहं पद्मानुवासितम् ।।
स्वपतिं च तदा प्राप्य कैलासं पुनरेष्यसि ।।७६
महावतीं पुरीं रम्यां राष्ट्रपालाय शारदा । करिष्यति तदा देवी मणिदेवस्तु त्वत्पतिः ।।७७
तया विरचितो भूमौ ग्रामरक्षार्थमुद्यतः । प्राप्तस्त्वां पद्मिनीं नारीं कैलासं पुनरेष्यति ।।७८
अतः स्वर्णवति त्वं वै कैलासं गुह्यकालयम् । गत्वाशु पद्मिनीं तत्र बोधयाशु वचः कुरु ।।७९
इति श्रुत्वा स्वर्णवती पद्मिनीं प्रति चागमत् । वृत्तान्तं कथयित्वाग्रे पद्मिनी तु दयातुरा ।।८०
कामपालं गृहं प्राप्य तत्र वासमकारयत् । स्वर्णवत्यपि सम्प्राप्ता तदा शीघ्रं महावतीम् ।।८१
तस्यां गतायां गेहे वै पद्मिन्या लिखितं शुभम् । पत्रं परिमलो राजा वर्तयामास हर्षितः ।।८२

---

(सोना) ने अपने अनुयायियों को आश्वासन प्रदानकर भगवती देवी चण्डिका की सविधान पूजा करना आरम्भ किया तथा नवरात्र के दिनों में भोजन और शय्या-शयन के त्याग भी । पश्चात् अन्त की रात्रि में उस घोर अँधेरी आधीरात के समय भगवती जगदम्बिका ने स्वर्णवती (सोना) से कहा—जिस पद्मिनी स्त्री को (लाखन समेत) तुम खोज रही हो, वह मणिदेव यक्ष की प्रिया है । यज्ञ में अपमानित होने पर उसने कामपाल के यहाँ जन्म ग्रहण किया है । वह मणिदेव कुबेर का सेनानायक है, युद्ध में जिसे पराजित

आगच्छ सेनया सार्द्धं कृष्णांश बलवत्तर । जित्वा पद्माकरं बन्धुं मत्पतिं मोचयाशु वै ॥
भूतले लक्षणो राजा स्थितः पद्माकरार्तिगः ॥८३
इति ज्ञात्वा च कृष्णांशो लक्षद्वादशसेनया । रुरोध नगरीं सर्वां कामपालेन रक्षिताम् ॥८४
कामपालस्तु बलवांस्त्रिलक्षबलसंयुतः । सुताज्ञया ययौ युद्धं सार्द्धं पद्माकरेण वै ॥८५
तयोश्चासीन्महद्युद्धं सेनयोरुभयोस्तदा । अहोरात्रप्रमाणेन भूपसेना पराजिता ॥८६
पद्मिनीं शरणं प्राप्य तदा भ्राता पिता स्थितः । तयोर्विजयमेवाशु यथाप्राप्तं चकार सा ॥
अन्तर्द्धानमयं पत्रं तयोरर्थे च सा ददौ ॥८७
तौ तत्रान्तर्हितौ भूत्वा स्वखड्गेन रिपोर्बलम् । अयुतं जघ्नतुर्मत्तौ तदा ते विस्मयं गताः ॥८८
तालनाद्या रणं त्यक्त्वा कृष्णांशं शरणं ययुः । कृष्णांशोऽपि तदा दुःखी ध्यात्वा सर्वमयीं शिवाम् ॥८९
दिव्यदृष्टिस्ततो जातः संप्राप्य तमयुध्यत । नभोगतं कामपालं तथा पद्माकरं नृपम् ॥९०
बद्ध्वा तत्र मुदाविष्टो लक्षणं प्राप्य निर्भयः । दोलामारोप्य तां देवीं स्वगेहाय मुदा ययौ ॥९१
जयचन्द्राय भूपाय दत्त्वा वै तौ च दम्पती । लक्षणं पद्मिनीं चैव कृतकृत्यस्तदाभवत् ॥९२
जयचन्द्रोऽपि बलवान्दृष्ट्वा गेहे स्वदम्पति । ददौ दानं द्विजातिभ्यो भूपतिं सममोचयत् ॥
ज्येष्ठे मासि सिते पक्षे कृष्णांशो गेहमागतः ॥९३

---

लिखा था कि सेना समेत बलवान् उदयसिंह शीघ्र आकर भाई पद्माकर को पराजित करके मेरे पति को शीघ्र मुक्त कराइये । 'राजा लक्षण (लाखन) इस पृथ्वी पर जीवित तथा पद्माकर द्वारा पीड़ित हैं, ऐसा जानकर उदयसिंह ने अपने बारह लाख सैनिकों समेत वहाँ पहुँचकर कामपाल की उस राजधानी को चारों ओर से घेर लिया । राजा कामपाल ने भी अन्य पुत्रों की आज्ञावश पद्माकर पुत्र तथा अपने तीन

इति ते कथितं विप्र कृष्णांशचरितं शुभम् । पुनस्ते कथष्यिामि दृष्टं योगबलेन वै ।।९४

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयो नाम त्रिंशोऽध्यायः ।३०

# अथैकत्रिंशोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

शृणु विप्र महाभाग चन्द्रभट्टस्तदा स्वयम् । महीराजं सदःस्थं तं चन्द्रतुल्यस्समागतः ।।१
तमागतं समालोक्य स राजा शोकतत्परः । उवाच वचनं रम्यं शृणु मन्त्रिवर प्रभो ।।२
कृष्णांशाद्यैर्महाशूरैर्मद्ग्रामे भयमागतम् । कदा ते च मरिष्यन्ति कण्टका मम दारुणाः ।।३
इत्युक्तस्स तु शुद्धात्मा ध्यात्वा सर्वमयीं शिवाम् । वचनं प्राह राजानं शृणु भूपशिरोमणे ।।४
जिष्णोरंशात्समुद्भूतो ब्रह्मानन्दो महावतीम् । स कृष्णांशसखः श्रेष्ठः सर्वदा तत्प्रिये रतः ।।५
यदा च मलनापुत्रो देहं त्यक्त्वा गमिष्यति । तदा ते सर्वदेवांशा गमिष्यन्ति यतो गताः ।।६
इत्येवं वादिनं धीरममात्यं च महीपतिः । वचनं प्राह नम्रात्मा कोऽप्यर्थश्चिन्तितो मया ।।७

---

(उदयसिंह) के इतने चरित्र को मैंने तुम्हें सुना दिया, किन्तु योगबल द्वारा जो कुछ उनके चरित को देखा है, मैं पुनः कहने का प्रयत्न कर रहा हूँ ।९४

श्री भविष्यमहापुराण के प्रतिसर्गपर्व में कलियुगीय इतिहाससमुच्चय
वर्णन नामक तीसवाँ अध्याय समाप्त ।३०।

एकाकिनं महाशूरं ब्रह्मानन्दं नृपोत्तमम् । समाहूय महीराजो द्विरागमनहेतवे ॥
छद्मना घातयित्वा तं कृतकृत्यो भविष्यति ॥८
इत्युक्तं नृपतिं प्राह महीराजः प्रसन्नधीः । वचनं शृणु भो मित्र गच्छ शीघ्रं महावतीम् ॥९
मलनां च समागत्य बोधयित्वा तु तां स्वयम् । ममान्तिकमुपागम्य चिरं जीव सुखी भव ॥१०
इति श्रुत्वा तु वचनं नत्वा तं च महीपतिः । रात्रौ घोरं मुनिश्रेष्ठ मलनां प्राह निर्भयः ॥११
वधूस्तव महाराज्ञि वेला नाम सुरूपिणी । संप्राप्ता यौवनवती पतियोग्या शुभानना ॥१२
कुजातिश्चैव कृष्णांशः श्रुतो राज्ञा महात्मना । अतो न प्रेषिता पुत्री तव पुत्राय धीमते ॥
अतो मद्वचनं मत्वा कुरु कार्यं तव प्रियम् ॥१३
मया सार्द्धं तव सुतो ब्रह्मानन्दो महाबलः । उर्वीयां नगरीं प्राप्य तदा मत्सैन्यसंयुतः ॥१४
महीराजमुपागम्य पत्नीं शीघ्रमवाप्स्यति । नो चेन्ममाज्ञया वेला त्यक्त्वा कान्तं मरिष्यति ॥१५
इति श्रुत्वा तु सा राज्ञी मोहिता देवमायया । राजानं समुपागम्य भ्रातुर्वचनमुत्तमम् ॥
कथयामास वै सर्वं श्रुत्वा भूपोऽब्रवीदिदम् ॥१६
महीपतिर्महाधूर्तो मद्विनाशाय चोद्यतः । तस्य वार्ता न मे रम्या कपटस्तेन निर्मितः ॥१७
इति श्रुत्वा च मलना राजानां कोपसंयुतम् । वचनं प्राह भो राजन्यथा बन्धुस्तथा ह्यहम् ॥
वचनं कुरु मे राजन्नो चेत्प्राणांस्त्यजाम्यहम् ॥१८

---

कर लिया है—वह यह है कि उस नृपश्रेष्ठ एवं महाबली ब्रह्मानन्द को गौने के बहाने से अकेले बुलाकर छल-कपट द्वारा उनका निधन करके आप कृतकृत्य हो जाँयेंगे। इस प्रकार कहते हुए उस राजा से प्रसन्न होकर पृथ्वीराज ने कहा—मित्र ! मेरी बात सुनो ! तुम शीघ्र महावती (महोबा) जाकर वहाँ मलना के

इत्युक्तवादिनीं रात्रौ तदा परिमलो नृपः । ब्रह्मानन्दं ददौ तस्मै स सुतो मातृवत्सलः ॥१९
मातुराज्ञां पुरस्कृत्य मातुलेन समन्वितः । रात्रौ च मातुलग्रामं सम्प्राप्य मुदितोऽभवत् ॥२०
प्रातःकाले च सम्प्राप्ते हरिनागरमास्थितः । एकाकी देहलीं रम्यां प्रययौ दैवमोहितः ॥२१
सायङ्काले तु सम्प्राप्ते महीराजस्य मन्दिरे । अगमां दर्शयामास सुरूपां दिव्यविग्रहाम् ॥२२
अगमा च समालोक्य परं हर्षमुपाययौ । माघशुक्लस्य चाष्टम्यां ब्रह्मानन्दश्च निर्भयः ॥
श्यालानां योषितः सप्त ददर्श रुचिराननाः ॥२३
तिस्रो नार्यश्च विधवाश्चतस्रो धवसंयुताः । ब्रह्मानन्दं शब्दमयं वाक्यमूचुर्मुदान्विताः ॥२४
ब्रह्मानन्द महाभाग सावधान वचः शृणु । तव पत्नी स्वयं काली वेला कलहरूपिणी ॥
सञ्जहार धवानेव नो वयं तु सुदुःखिताः ॥२५
सापत्न्यमस्तु तत्तस्या गृहाणास्मान्मनोहर । धवान्विदेहि नो वीर पतिर्भवमुदान्वितः ॥२६
इति श्रुत्वा वचस्तासां ब्रह्मानन्दो महाबलः । उवाच मधुरं वाक्यं श्रुतिस्मृतिसमन्वितम् ॥२७
पुरा सत्ययुगे नारी चोत्तमा च पतिव्रता । त्रेतायां मध्यमा जाता निकृष्टा द्वापरे पुनः ॥२८
अधमा हि कलौ नारी परपुंसोपभोगिनी । अतस्तु कलिकाले वै विवाहो विधवास्त्रियाः ॥
देवलेन शुभः प्रोक्तश्चासितेन स्वयं स्मृतौ ॥२९
सती सत्ये तु सा प्रोक्ता त्रेतायां पतिभस्मगा ॥३०

---

कर उसे स्वीकार करने की कृपा करें, अन्यथा मैं प्राण त्याग दूंगी । इस प्रकार रानी के कहने पर विवश होकर उसी समय राजा ने अपना प्रिय पुत्र ब्रह्मानन्द माहिल को सौंप दिया । ब्रह्मानन्द भी माता की आज्ञा शिरोधार्यकर अपनी मामा के साथ में सानन्द उनके नगर उर्वी (उरई) में पहुँच गये । पश्चात्

सती सा मध्यमा प्रोक्ता द्वापरे विधवा सती। ब्रह्मचर्यपरा ज्ञेया कलौ नास्ति सतीव्रतम् ॥३१
अतो यूयं मया सार्द्धं भुंक्षध्वममलं सुखम्। इति श्रुत्वा प्रियं वाक्यं तिस्रस्ता विधवाः स्त्रियः ॥३२
कृत्वा शृङ्गाररूपाणि भूषणानि च सर्वशः। ब्रह्मानन्दमुपागम्य समालिङ्गनतत्पराः ॥३३
ता दृष्ट्वा मलनापुत्रो वचनं प्राह निर्भयः ॥३४
युष्माभिः पतयो मुक्ता ये च मद्बन्धुना हताः ॥३५
युष्मानतो न गृह्णीयां सत्यं सत्यं ब्रवीम्यहम्। इति श्रुत्वा वचो घोरं हास्ययुक्तं च योषितः ॥३६
महीराजान्तमागम्य रुरुदुर्भृशदुःखिताः। राजन्वेलापतिर्धूर्तो मम धर्मं जहाति वै॥
दण्डं देहि च धूर्ताय नो चेत्प्राणांस्त्यजाम्यहम् ॥३७
इति श्रुत्वा महीराजो ब्रह्मानन्दं महाबलम्। समाहूय वचः प्राह भवान्भूपकुलाधमः ॥३८
परस्त्रियं च यो भुङ्क्ते स याति यममन्दिरम्। अद्यैव त्वं सुताकान्त कारागृहमवाप्नुयाः ॥३९
इति श्रुत्वा वचो घोरं ब्रह्मानन्दो महाबलः। सत्सरोः खड्गमुत्सृज्य महीराजमधावत ॥४०
दृष्ट्वा भयातुरो राजा चामुण्डान्तमुपाययौ। कपाटं दृढमाच्छाद्य तत्र वासमकारयत् ॥४१

## ऋषय ऊचुः

तासां कथं विवाहाः स्युस्तत्त्वं नो ब्रूहि विस्तरात्। कुत्रत्यास्ताः किमंशाश्च दृष्टा योगेन वै त्वया ॥४२

---

भस्म हो जाती थीं। और द्वापर में विधवा रहकर सती आचरण करती हुई ब्रह्मचर्य की अन्तिम रेखा का पालन करती थीं। किन्तु कलियुग में सती-व्रत का विधान ही नहीं है। इसलिए तुम लोग मेरे सम्पर्क में रहकर सुखसागर की चरम सीमा का अनुभव अवश्य प्राप्त करो। उनकी इस श्रवण सुखद वाणी को सुनकर उन तीनों स्त्रियों ने भूषण-भूषित होती हुई अपने सौन्दर्यमय शृङ्गार की रचना करके ब्रह्मानंद के साथ पहुँचकर उनसे आलिंगन करने की इच्छा प्रकट की। उन्हें देखकर मलना-पुत्र ब्रह्मानन्द ने निर्भीक

## सूत उवाच

अङ्गदेशे मुनिश्रेष्ठ मायावर्मनृपोऽभवत् । तामसीं पूजयित्वा वै शक्तिं सर्वविमोहिनीम् ।।४३
वर्मोत्तमं तया दत्तं सर्वसत्त्वभयङ्करम् । गृहीत्वा स तु भूपालः प्रस्थितोऽभून्महीतले ।।४४
प्रमदा नाम तत्पत्नी दश पुत्रानसूषुवत् । कौरवांशान्महाभाग वर्षान्ते नाम मे शृणु ।।४५
मत्तः प्रमत्त उन्मत्त सुमत्तो दुर्मदस्तथा । दुर्मुखो दुर्धरो बाहुः सुरथो विरथः क्रमात् ।।
तेषां स्वसानुजा चासीत्सुनाम्ना मदिरेक्षणा ।।४६
तस्या वै सुन्दरं रूपं मदाघूर्णितलोचनम् । कितवो नाम वै दैत्यो दृष्ट्वा मोहमुपागतः ।।४७
मायावर्माणमागत्य वचनं प्राह नम्रधीः । यदि त्वं मे स्वतनयां देहि कामातुराय च ।।४८
तर्हि ते सकलं कार्यं करिष्यामि न संशयः । इति श्रुत्वा तदा भूपो ददौ तस्मै स्वकन्यकाम् ।।४९
कितवो गह्वरावासी रात्रौ घोरे तमोवृते । नृपगेहमुपागम्य बुभुजे स्मरविह्वलः ।।
प्रातःकाले तु तां त्यक्त्वा कन्दरान्तमुपाययौ ।।५०
वर्मदेवमते जाते ततो राजा मदातुरः । पुरोहितं समाहूय लक्षद्रव्यसमन्वितम् ।।
महीराजाय सम्प्रेष्य तारकं स समावृणोत् ।।५१
महीराजस्तु बलवाँल्लक्षषोडशसैन्यपः । संयुतः शतभूपालैर्मासान्ते समुपागमत् ।।५२
कृष्णांशे पञ्चदशके सम्प्राप्ते व्रततत्परे । तारकश्च विवाहाय बहुभूपाऽगमानयत् ।।५३

---

**सूत जी बोले**—मुनिश्रेष्ठ ! अङ्गदेश का मायावर्मा नामक राजा था । उसने सबको मोहित करने वाली तामसी शक्ति की उपासना की । उससे उसे एक उत्तम वर्म (कवच) की प्राप्ति हुई, जो समस्त प्राणियों के लिए भयप्रद था । उसे अपनाकर उस राजा ने इस पृथ्वी पर पर्यटन किया । पश्चात् प्रमदा

मायावर्मा च तं दृष्ट्वा तारकं भूपसंयुतम् । वचनं प्राह बलवान्राजराज वचः शृणु ।।५४
कितवो नाम मेधावी दैत्यवंशयशस्करः । तेन मे पीडिता बाला रात्रौ घोरतमोवृते ।।५५
हता भूपकुमाराश्च मत्सुतार्थं समागताः । भक्षितास्तेन दैत्येन संययुस्ते यमालयम् ।।५६
तेषां च बहुधा द्रव्यं लुण्ठयित्वा मदातुरः । मत्सुतायै ददौ सर्वं तस्मात्त्वं दितिजं जहि ।।५७
इति श्रुत्वा महीराजस्सर्वसैन्यसमन्वितः । कितवं च समाहूय महद्युद्धमचीकरत् ।।५८
कितवस्स तु मायावी जित्वा सर्वान्महाबलान् । तारकं च समाहृत्य गुहायां समुपागमत् ।।५९
तारकश्च तदा दुःखी ध्यात्वा शङ्करमुत्तमम् । पाषाणभूतो ह्यगमन्महादेवप्रसादतः ।।६०
एतस्मिन्नन्तरे प्राप्ता महावतीनिवासिनः । क्षत्रिया दशसाहस्राः कृष्णांशाद्यैश्च पालिताः ।।६१
महीराजस्तु तान्दृष्ट्वा बलखानिं महाबलम् । उवाच वचनं प्रेम्णा पुत्रशोकेन दुःखितः ।।६२
तारकः कितवेनैव संहृतो दितिजेन वै । यदि त्वं मे सुतं देहि कोटिस्वर्णं ददामि तत् ।।६३
इति श्रुत्वा तु ते धीराः कृष्णांशो देवसिंहकः । वत्सजौ च तथागम्य कितवं रुरुधुर्बलात् ।।६४
अहोरात्रमभूद्युद्धं तेषां तेन समन्वितम् । कितवस्तु रुषाविष्टः कृष्णांशं देवसिंहकम् ।।
बलखानिं मोहयित्वा जगर्ज च पुनः पुनः ।।६५
सुखखानिस्तदा शूरः कितवं बलवत्तरम् । स्वखड्गेन शिरस्तस्य छित्वा राजानमागमत् ।।६६

---

उस समय मायावर्मा ने तारक (ताहर) समेत बैठे हुए राजा पृथ्वीराज से कहा—बलवान् राजाधिराज ! मेरी विनम्र प्रार्थना सुनने की कृपा करें । दैत्यवंश का ख्यातिप्राप्त एवं मेधावी एक कितव नामक दैत्य है, जो घोर अंधेरी रात्रि में मेरी पुत्री को पीड़ित करता रहता है । उस मेरी पुत्री के पाणिग्रहण करने के लिए अनेक राजकुमार आये थे किन्तु इस दैत्य ने उन्हें भक्षण करके यमपुरी भेज दिया और उनके अनेक प्रकार के धनों को लूटकर मेरी पुत्री को अर्पित किया है । इसलिए मेरी प्रार्थना है कि आप उस दिति-पुत्र

त्रयस्ते सुखिनो भूत्वा सुखखानिं प्रशस्य च । महीराजाय च ददौ तारकं कैतवं शिरः ।।६७
तदा भूपसुता देवी सुखखानिं समावृणोत् । महीपतिस्तदागत्य तत्सुतां मदिरेक्षणाम् ।।६८
सम्बोध्य विविधैर्वाक्यैर्भूमिराजान्तमागमत् । तारकस्य तया सार्द्धं विवाहो मुदितोऽभवत् ।।६९
कोटिस्वर्णं नृपात्प्राप्य बलखानिर्महाबलः । प्रययौ बन्धुभिस्सार्द्धं शिरीषाख्यपुरं शुभम् ।।७०

## सूत उवाच

गुर्जरे नृपतिश्चासीन्मूलवर्मा महाबलः । प्रभावती तस्य सुता दशपुत्रानुजाभवत् ।।७१
बलश्च प्रबलश्चैव सुबलो बलवान्बली । सुमुलश्च महामूलो दुर्गो भीमो भयङ्करः ।।७२
करभो नाम वै यक्षो लल्लराजस्य सेवकः । प्रभावतीं समालोक्य मुमोह मदविह्वलः ।।
पञ्चवर्षान्तरे जाते तेन भुक्ता कुमारिका ।।७३
मूलवर्मा महीराजं समाहूय ससैन्यकम् । वचनं प्राह नम्रात्मा राजराजवचः कुरु ।।७४
प्रभावतीं शुभां कन्यां नृहराय ददाम्यहम् । इत्युक्त्वा नृहरं पुत्रं समाहूय स्वमन्दिरे ।।
ददौ वेदविधानेन सुतां च नृहराय वै ।।७५
पक्षमात्रान्तरे यक्षः करभस्तत्र चागतः । दम्पती पीडयामास जित्वा सर्वमहीपतीन् ।।७६
महीराजस्तदा दुःखी वत्सजौ बलवत्तरौ । समाहूय कथित्वाग्रे रुरोद बलवान्बली[2] ।।७७

---

आनन्दमग्न होते हुए सुखखानि की प्रशंसा कर रहे थे । जिस समय उन्होंने तारक (ताहर) समेत कितव के शिर को पृथ्वीराज के सम्मुख उपस्थित किया, उस समय वह राजपुत्री सुखखानि के साथ अपना वरण करना चाहती थी, किन्तु महीपति (माहिल) ने वहाँ आकर उस मदिरेक्षणा को अनेक भाँति से समझा बुझाकर पृथ्वीराज के पास उपस्थित किया । अनन्तर तारक (ताहर) के साथ उसका विवाह संस्कार सम्पन्न कराया और मलखान को एक कोटि सुवर्ण की प्राप्ति हुई । जिससे वे अपने भाइयों समेत अपनी शिरीष नगरी को लौट आये ।६१-७०

दयालू वत्सजौ वीरौ करभान्तमुपेयतुः । करभस्तौ समालोक्य तत्रैवान्तर्धिमागतम् ॥
नागपाशेन तौ बद्ध्वा पीडयामास दम्पती ॥७८
इति श्रुत्वा स कृष्णांशः करभं यक्षकिङ्करम् । बद्ध्वा योगबलेनैव मोचयामास दम्पती ॥७९
भ्रातरौ तौ समागम्य नागपाशं तु चासिना । छित्त्वा मुमोद बलवान्कोटिस्वर्णं गृहीतवान् ॥
भूमिराजः प्रसनन्नात्मा देहलीं मुदितोऽगमत् ॥८०

## सूत उवाच

काश्मीरे च नृपश्चासीत्कैकयो नाम विश्रुतः । दश पुत्राश्च तस्यैव कन्या च मदनावती ॥८१
कामः प्रकामः सङ्क्रामो निष्कामो निरपत्रपः । जयश्च विजयश्चैव जयन्तो जयवाञ्जयः ॥८२
स भूपो भूमिराजं च समाहूय वचोऽब्रवीत् । पुत्रस्ते वै सरदनो मत्कन्यां प्राप्तुमर्हति ॥८३
गन्धर्वस्सुकलो नाम मत्कन्यां च शुभाननाम् । ज्योत्स्नायां[१] निशि संहृत्य तया सार्द्धं हि दीव्यति ॥८४
पूर्णिमायां च सम्प्राप्तः स वै चित्ररथप्रियः । वैशाखस्यासिते पक्षे चाष्टमी चाद्य मङ्गला ॥
वधं कुरु नृपश्रेष्ठ देहलीं गन्तुमर्हसि ॥८५
इति श्रुत्वा महीराजो लक्षसैन्यसमन्वितः । गृहीत्वा दम्पती शीघ्रं देहलीनगरं ययौ ॥८६
वैशाख्यां सुखजातायां सुकलो नाम वीर्यवान् । गन्धर्वो दश साहस्रै रुरोध नगरं रुषा ॥८७

---

दयानिधान ये दोनों पुत्र करभ के पास पहुँच गये । किन्तु उस यक्ष ने उन्हें देखते ही अन्तर्हित होकर नागपाश से इन दोनों को बांधकर पुनः उन स्त्री-पुरुष को पीड़ित करना आरम्भ किया । इसे सुनकर उदयसिंह उस करभ के पास पहुँचे और अपने योगबल द्वारा उसे बाँधकर उस दम्पती को दुःख से मुक्त किया । पश्चात् भाई के पास पहुँचकर अपनी तलवार से उनके नागपाश को काट दिया । तदुपरांत पृथ्वीराज से कोटि सुवर्ण की मुद्रा का ग्रहण करते हुए प्रसन्नतापूर्वक वे लोग अपने घर चले गये और

नगराच्च बहिर्जाता ये शूरा मदविह्वलाः । हत्वा तान्सुकलः शीघ्रं राज्ञे दुःखं चकार ह ।।८८
भयभीतो महीराजो ध्यात्वा सर्वमयीं शिवाम् । सुष्वाप निशि शुद्धात्मा तुष्टाभूज्जगदम्बिका ।।८९
कृष्णांशादीन्बोधयित्वा तैश्च सार्धं समागमत् । तेषां चासीन्महद्युद्धं गन्धर्वेण तदाह्निकम् ।।९०
बलखानिश्च बलवान्छतगन्धर्वमुत्तमम् । त्रिदिनान्ते च संहृत्य सुखखानिस्तथैव च ।।९१
सुकलश्च तदा क्रुद्धो गान्धर्वीं च ससर्ज ह । बहुधा ते हि गन्धर्वास्तैश्च सार्द्धं समारुधन् ।।९२
भयभीतास्तदा सर्वे रामांशं शरणं ययुः । आह्लादश्च प्रसन्नात्मा शारदां सर्वमङ्गलाम् ।।९३
दिवासूक्तेन तुष्टाव तदा प्रादुरभूच्छिवा । गन्धर्वान्मोहयित्वाशु द्रावयामास शारदा ।।९४
पराजिते च गन्धर्वे कृष्णांशो जनमोहनः । महीराजमुपागम्य कोटिस्वर्णं गृहीतवान् ।।९५
षोडशाब्दे च कृष्णांशे सम्प्राप्ते देविपूजके । मार्गमासे तु सम्प्राप्ते मर्दनश्च विवाहितः ।।९६

## सूत उवाच

पुण्ड्रदेशे महाराजो नागवर्मा महाबलः । बभूव तक्षकपरो धर्मवाञ्जगतीतले ।।९७
पत्नी नागवती तस्य तक्षकस्य सुता शुभा । पितुः शापेन सञ्जाता कलिङ्गाधिपतेः सुता ।।९८
दशैव तनयाश्चासन्कन्या तस्य शुभानना । सुवेला नाम विख्याता रूपयौवनशालिनी ।।९९

---

भी मदान्ध योद्धा के बाहर होने पर उसे वह सुकल गन्धर्व भक्षण कर लेता था । इस प्रकार उसने अल्प-काल में ही पृथ्वीराज को अत्यन्त कष्ट प्रदान किया । शुद्धात्मा पृथ्वीराज ने भी उससे भयभीत होकर सर्वमयी भगवती शिवा के ध्यान पूर्वक ही शयन किया । उनके ध्यान करने से अत्यन्त प्रसन्न होकर जगदम्बिका ने उदयसिंह आदि को इसका ज्ञान कराती हुई उन्हें साथ ले वहाँ को प्रस्थान किया । वहाँ पहुँचने पर उन लोगों का उस गन्धर्व के साथ दिन भर घोर संग्राम होता रहा ।८१-९०। उस युद्ध में

पुरोहितं समाहूय महीराजाय प्रैषयत् । स गत्वा कथयित्वाग्रे मर्दनो वरितो मया ।।१००
महीराजस्तु तच्छ्रुत्वा त्रिलक्षबलसंयुतः । मङ्गलं कारयामास गत्वा नागपुरे शुभे ।।१०१
सुवेला पितरं प्राह देहि मे नागभूषणम् । विवाहं हि करिष्यामि नो चेत्प्राणांस्त्यजाम्यहम् ।।१०२
इति श्रुत्वा नागवर्मा महीराजान्तमाययौ । सुवेलाया अभिप्रायं वर्णयामास विस्तरात् ।।१०३
इत्युक्तः स महीराजो विस्मितोभूत्सुदुःखितः । प्रेषयामास वै पत्रं यत्राह्लादादयः स्थिताः ।।१०४
इति ज्ञात्वा तदाऽऽह्लादः शूरपञ्चशतावृतः । कृष्णांशवत्सजैस्सार्द्धं दिनान्ते च समागतम् ।।१०५
शतयोजनगामिन्यो वाजिन्यश्च द्वियामके । सहस्रयोजनं वीर्यं तासां चैव दिने निशि ।।१०६
कलांशादुद्भवा अश्वा वाजिनां च हरेः स्वयम् । रत्नाश्वस्य कलांशश्च कपोतो हरिणीभव: ।।१०७
गायत्रो योभवद्वाजी कालचक्रप्रवर्तकः । तत्कलांशातसमुद्भूतो रविदत्तः पपीहकः ।।
हरिणी नाम तच्छक्तिः कलांशाद्भूमिमागता ।।१०८
सुखखानिः पपीहस्थो बलखानिः कपोतगः । आह्लादश्च करालस्थो बिन्दुलस्थो हरेः कला ।।१०९
गत्वा ते तु महीराजं नत्वा तुङ्गासनां ययुः । प्रसन्नः स महीराजो वचनं प्राह नम्रधीः ।।११०
मम पुत्राश्च युष्माभिस्त्रयः शूरा विवाहिताः । तथैव मर्दनं वीरं समुद्वाह्य सुखी भव ।।१११
इति श्रुत्वा स आह्लादो गत्वा भूतलमुत्तमम् । रसातलं च विख्यातं नागिनीं प्राह निर्भयः ।।११२

---

अपने पुरोहित द्वारा पृथ्वीराज से कहला दिया कि मैंने मर्दन नामक आपके पुत्र का वरण कर लिया है। उसे सुनकर पृथ्वीराज ने अपने तीन लाख सैनिकों समेत उस नागपुर में जाकर मांगलिक विधान सुसम्पन्न किया। उस समय सुवेला ने अपने पिता से कहा—आप नागभूषण मुझे प्रदान करने की कृपा कीजिये, उसके मिलने पर ही मैं विवाह करूँगी, अन्यथा प्राणपरित्याग कर दूंगी। इसे सुनकर नागवर्मा ने पृथ्वीराज के पास पहुँचकर उनसे सुवेला के समस्त अभिप्राय का विस्तारपूर्वक वर्णन किया। इसे

सुप्तो हि तव भर्ता च पुण्डरीकः शुभाननः । बोधयाशु महाराज्ञि नागानां नो दयां कुरु ।।११३
इत्युक्ता साह तं वीरं पुण्डरीकश्च मत्पतिः । रुषाविष्टश्च बलवान्दाहयेच्च वपुस्तव ।।११४
इति श्रुत्वा विहस्याह तव भर्तुर्न नो भयम् । इत्येवं वचनं कृत्वा पद्भ्यां पुच्छमताडयत् ।।११५
प्रबुद्धश्च तदा राजा नागानां च महाबलः । ज्वालामालां स्वदेहाच्च जनयामास वीर्यवान् ।।११६
दृष्ट्वा तद्विषमुज्ज्वालं स ध्यात्वा सर्वमङ्गलाम् । शमयामास बलवान्देवीपूजनतत्परः ।।११७
पुण्डरीकः प्रसन्नात्मा नागभूषणमुत्तमम् । आह्लादाय ददौ शीघ्रं सर्वशृङ्गारसंयुतम् ।।११८
आह्लादस्तु हयारूढो महीराजाय दत्तवान् । विवाहं कारयामास वैवाहिकविधानतः ।।
कोटिस्वर्णं नृपात्प्राप्तं गृहीत्वा शीघ्रमाययौ ।।११९
हयविद्यासमारूढास्ते हया गेहमागताः । ज्ञेयाः पञ्चशतं सर्वे सशूरा गृहमाययुः ।।१२०

## सूत उवाच

मद्रदेशेषु यश्चासीन्मद्रकेशो महाबलः । पञ्चाब्दं पूजयामास स्वर्गवैद्यौ सुरोत्तमौ ।।१२१
तयोश्च वरदानेन दश पुत्रा बभूविरे । सुता कान्तिमती जाता रूपयौवनशालिनी ।।१२२
स महीराजमाहूय त्रिलक्षबलसंयुतम् । ददौ कन्यां विधानेन मद्रेशः सूर्यवर्मणे ।।१२३
नवोढां तु तदा पत्नीं सूयवर्मा गृहीतवान् । स्वगेहाय ययौ शीघ्रं महीराजो बलैस्सह ।।१२४

---

निर्भय होकर नागिनी से कहा—महारानी ! तुम्हारे पति महोदय पुण्डरीक जी शयन कर रहे हैं, मेरे आगमन की उन्हें शीघ्र सूचना दो, इस समय नागों पर दया मत करो । इसे सुनकर उसने कहा—मेरे पति पुण्डरीक जागने पर अपने वीरों समेत क्रुद्ध होकर तुम्हारे शरीर को दग्ध कर देंगे । उन्होंने हँसते हुए कहा—मुझे तुम्हारे पति का भय नहीं है । ऐसा कहते हुए उन्होंने स्वयं अपने चरणों द्वारा उनकी पूंछ में प्रहार किया । नागों के महाबली राजा उसी समय नाग बनकर अपनी शरीर से विष-ज्वालाओं की

कर्बुरो नाम मायावी विभीषणसुतो बली । राक्षसस्तत्र सम्प्राप्तो दृष्ट्वा कान्तिमतीं शुभाम् ।।१२५
मद्रकेशस्य तनयां दिव्यशोभासमन्विताम् । जहारपश्यतां तेषां सह्याद्रिगिरिमाययौ ।।१२६
महीराजस्तदा दुःखी विललाप भृशं मुहुः । देहलीगेहमागम्य दूतमाहूय सत्वरम् ।।१२७
कृष्णांशं प्रेषयामास स गत्वा समवर्णयत् । ज्ञात्वा ते तु हयारूढाः शूराः पञ्चशतावृताः ।।१२८
सह्याद्रिगिरिमागम्य कृष्णांशः कर्बुरं प्रति । निर्भयो वचनं प्राह शृणु राक्षससत्तम ।।१२९
विभीषणो भक्तराजस्तस्य त्वं दयितः सुतः । तस्मात्त्वया न कर्तव्यं पापं वंश विनाशनम् ।।
रावणेन पुरा सीता संहृता विदितं तव ।।१३०
इति श्रुत्वा स होवाच पुरेयं दयिता प्रिया । मम गन्धर्वतनया मुनिशापान्महीं गता ।।१३१
अतोऽहं तद्वियोगेन त्यक्त्वा लङ्कां महापुरीम् । मद्रकेशमहं प्राप्य मद्रकेशभयादहम् ।।
न जहार प्रियां रम्यां तत्रोषित्वा दिनं बहु ।।१३२
अद्य मे वशगा साभून्नाम्ना कान्तिमती शुभा । जित्वा मां च गृहाणाशु समर्थाश्च वयं सदा ।।१३३
इति श्रुत्वा स कृष्णांशः खड्गयुद्धमचीकरत् । सप्तरात्रेण तं जित्वा लब्ध्वा कान्तिमतीं शुभाम् ।।
तदा च देहलीं प्राप्य महीराजान्तमाययौ ।।१३४
कोटिस्वर्णं ददौ राजा कृष्णांशाय महात्मने । स वीरो बन्धुभिः सार्धं प्रमदावनमाययौ ।।१३५

---

साथ अपने नगर को प्रस्थान किया । उसी बीच कर्बुर नामक मायावी राक्षस ने जिसे बली एवं विभीषण का पुत्र बताया गया है, वहाँ आकर उस कल्याणमुखी कान्तिमती को देखा । पश्चात् उसने उन लोगों के देखते ही दिव्य सौन्दर्य पूर्ण उस मद्रकेश की पुत्री का अपहरणकर सह्याद्रि नामक पर्वत को प्रस्थान किया । उस समय दुःखी होकर पृथ्वीराज बार-बार विलाप कर रहे थे । किसी प्रकार से दिल्ली आकर उन्होंने अपने एक दूत को उदयसिंह के पास भेजा । दूत ने वहाँ जाकर उदयसिंह आदि लोगों से समस्त

## सूत उवाच

पट्टनाख्यपुरे राजा नाम्ना पूर्णामलो बली । वसूनाराधयामास पञ्चवर्षान्तरे मुदा ॥
तदा प्रसन्नास्ते देवा ददुस्तस्मै वरं शुभम् ॥१३६
वरदानाच्च सञ्जाता दश पुत्रा महीपतेः । विद्युन्माला सुता जाता रूपयौवनशालिनी ॥१३७
तद्विवाहार्थमाहूय महीराजं महाबलम् । सप्तलक्षबलैः सार्द्धं तत्पुत्राय सुतां ददौ ॥१३८
महीराजसुतो भीमः पत्नीं प्राप्य मनोरमाम् । गेहमागम्य तैः सार्धं देहलीं हर्षमाप्तवान् ॥१३९
तदा पैशाचदेशस्थः सहोदश्च महीपतिः । म्लेच्छैश्च दशसाहस्रैर्विद्युन्मालार्थमुद्यतः ॥१४०
बलिदैत्याज्ञया प्राप्तः कुरुक्षेत्रं शुभस्थलम् । भित्त्वा मूर्तीः सुराणां गोरक्तैस्तीर्थजलं कृतम् ॥१४१
पत्रमालिख्य बलवान्महीराजाय धर्मिणे । स्वदूतः प्रेषितस्तेन श्रुत्वा भूपोऽब्रवीदिदम् ॥१४२
भवान्म्लेच्छपती राजा विद्युन्मालार्थमुद्यतः । मां शब्दवेधिनं विद्धि चौर्यदेशधुरन्धरम् ॥१४३
इत्युक्त्वा स त्रिलक्षैश्च कुरुक्षेत्रमुपागतः । तयोश्चासीन्महद्युद्धमहोरात्रं भयानकम् ॥१४४
निशीथे समनुप्राप्ते ज्येष्ठे मासि तमोमये । पातालाद्बलिरागत्य दैत्यायुतसमन्वितः ॥१४५
नृपसैन्यं जघानाशु भक्षयित्वा पुनः पुनः । भयभीतस्तदा राजा शारदां शरणं ययौ ॥१४६
एतस्मिन्नन्तरे देवाः कृष्णांशाद्या महाबलाः । क्षणमात्रेण सम्प्राप्तास्तदा पदचरा मुने ॥१४७

---

**सूत जी बोले**—पटना नगर का अधीश्वर वली पूर्णामल था, जिसने प्रसन्नतापूर्ण रहकर पाँच वर्ष तक अनवरत वशुओं की आराधना की । उनकी सेवा से प्रसन्न होकर उन देवों ने उन्हें शुभ वरदान प्रदान किया, जिसके द्वारा राजा के दश पुत्र और विद्वन्माला नामक एक कन्या उत्पन्न हुई । कन्या के रूप- यौवन सम्पन्न होने पर राजा ने पृथ्वीराज को अपने यहाँ सादर निमंत्रित किया । सात लाख सैनिकों समेत उस पुत्र के साथ पृथ्वीराज के वहाँ आने पर उन्होंने अपनी पुत्री का पाणिग्रहण संस्कार

हत्वा दैत्यसहस्राणि बलिदैत्यमुपाययुः । देशजौ वत्सजौ वीरौ देवसिंहस्तथैव च ॥
स्वखड्गैस्तर्पयामास दैत्यराजं महाबलम् ॥१४८
तदा प्रसन्नो बलवान्दैत्यराजो बलिः स्वयम् । वरं वृणुत तानाह ते तु श्रुत्वाब्रुवन्वचः ॥१४९
आर्यदेशं च ते दैत्या नागच्छन्तु त्वया सह । म्लेच्छदेशं सदा प्राप्य भक्षध्वं म्लेच्छधर्मगान् ॥१५०
इति श्रुत्वा वचो घोरं विप्रियं च बलिः स्वयम् । कृष्णांशमुदयं गत्वा तुष्टाव परया गिरा ॥१५१
तदा प्रसन्नः कृष्णांशो वचनं प्राह निर्भयः । यावदहं भूमिवासी तावत्त्वं गेहमावस ॥
तत्पश्चाद्भूमिमागत्य यथायोग्यं कुरुष्व भोः ॥१५२
इति तद्वचनं श्रुत्वा सहोदो नीलसंयुतः । पैशाचं देशमगमत्पुनः प्राप्तो रसातलम् ॥१५३
भूमिराजः प्रसन्नात्मा कोटिस्वर्णं ददौ तदा । गजारूढाश्च ते पञ्च संययुश्च महावतीम् ॥१५४

## सूत उवाच

वर्द्धनो भूमिराजस्य सुतः सर्वेभ्य उत्तमः । पञ्चमाब्दवया भूत्वा श्रीदं तुष्टाव भक्तितः ॥
वर्षान्तरे च भगवान्ददौ सर्वं शुभं निधिम् ॥१५५
तत्सर्वनिधिभावेन नृपकोशः समन्ततः । पूर्णो बभूव कनकैः राजराजप्रभावतः ॥१५६
किन्नरी नाम या कन्या मङ्कणस्य प्रकीर्तिता । कुबेरश्च ददौ तस्मै वर्द्धनाय प्रियाय च ॥
इति ते कथितं सर्वं विवाहचरितं मुने ॥१५७

---

दैत्यों के निधन करने के उपरांत ये वलि के सम्मुख पहुँचकर उनके ऊपर वत्सराज के दोनों पुत्रों और देव-सिंह ने अपने-अपने खड्ग द्वारा प्रहार करना आरम्भ किया । उनके युद्ध कौशल से प्रसन्न होकर दैत्य- राज बलि ने इन लोगों से अभिलषित वर की याचना करने के लिए कहा । उसे सुनकर इन लोगों ने

धुन्धुकारो महाशूरो लक्षसैन्यसमन्वितः । ब्रह्मानन्दमुपागम्य युद्धार्थाय तमाह्वयत् ।।१५८
एकत्रिंशाब्दके प्राप्ते कृष्णांशे बलवत्तरे । एकाकी मलनापुत्रो दृष्ट्वा सैन्यमुपस्थितम् ।।
ब्रह्मास्त्रं चापआधाय चार्धसैन्यमदाहयत् ।।१५९
पञ्चायुताश्च ते शूरा भयभीता दिशो गताः । धुन्धुकारो रणं त्यक्त्वा भूमिराजमुपागमत् ।।१६०
महीराजस्तदा दुःखी भयभीतः समन्ततः । महीपतिं समाहूय चन्द्रभट्टं च सोऽब्रवीत् ।।१६१
कथं जयो मे भविता तत्सर्वं मन्त्रयाशु वै । महीपतिस्तदा प्राह शृणु भूपशिरोमणे ।।१६२
कृत्वा नारीमयं वेषं चामुण्डं बलशालिनम् । वेलां मत्वा च तद्दोलां ब्रह्मानन्दाय चार्पय ।।१६३
चत्वारस्ते सुताः शूरा धुन्धुकारेण संयुताः । छद्मना च स्वशस्त्रैश्च घातयेयुस्तमूर्जिताः ।।१६४
इति श्रुत्वा महीराजो ब्रह्मानन्दाय हर्षितः । तथा कृत्वा ददौ दोलां पञ्चशूरैश्च पालिताम् ।।१६५
सायङ्काले तु सम्प्राप्ते माघशुक्लाष्टमीदिने । वेलावंशश्च चामुण्डो ब्रह्मानन्दमुपाययौ ।।१६६
छद्मना च त्रिशूलं च बलात्कृत्वा रिपूदरे । रुरोद बलवाञ्छूरस्ते तु शूराः समागताः ।।१६७
तारको हृदि तं बाणैः सूर्यवर्मा च तोमरैः । भीमश्च गदया चात्र वर्द्धनश्च तदासिना ।।
धुन्धुकारश्च भल्लेन जघान रिपुमूर्द्धनि ।।१६८
मूर्छितः पतितो भूमौ ब्रह्मानन्दो महाबलः । महद्व्रणयुतस्तत्र स्वखड्गं च समाददत् ।।१६९
भीमस्य च शिरः कायाद्वर्द्धनस्य तथैव च । छित्त्वा तथैव भूमध्ये सूर्यवर्माणमागतः ।।१७०

---

महावली धुंधुकार (धांधु) ने अपने एक लाख सैनिकों समेत वहाँ आकर युद्ध के लिए ब्रह्मानन्द को ललकारा । उस समय बलवान् उदयसिंह की इकतीसवें वर्ष की अवस्था आरम्भ थी । उस सेना को देखकर मलनापुत्र ब्रह्मानन्द ने अकेले ही अपने ब्रह्मास्त्र वाण द्वारा उनकी आधी सेना दग्ध कर दिया । शेष पचास सहस्र सैनिक भयभीत होकर इधर-उधर भाग गये । अनन्तर धुंधुकार (धांधू) भी रणस्थल

तारको धुन्धुकारश्च चामुण्डश्च तथैव च। ब्रह्मानन्दं तदा त्यक्त्वा महीराजान्तमाययौ ॥१७१
हतेषु तेषु पुत्रेषु महीराजो भयातुरः। वेलापार्श्वमुपागम्य रुरोद बहुदुःखितः ॥१७२
इति श्रुत्वा तदा वेला दोलामारुह्य सत्वरम्। ब्रह्मानन्दं ययौ शीघ्रं मूर्च्छितं तं ददर्श ह ॥१७३
कनिष्ठामृतभावेन वेलाया बलवांस्तदा। उत्थाय रुदतीं नारीं ददर्श रुचिरान्विताम् ॥१७४
का त्वं कस्य सुता रम्या सङ्ग्रामे मामुपस्थिता। जलं देहि महासुभ्रूर्वचनं कुरु सुप्रियम् ॥१७५
इति श्रुत्वा तदा वेला जलं दत्त्वा शुचान्विता। वचनं प्राह वै रात्रौ शृणु त्वं मलनासुत ॥१७६
वेला नाम महीभर्तुः सुताहं त्वामुपस्थिता। मत्पतिश्च भवान्धीरश्छद्मना वञ्चकैर्हतः ॥
जीवनं कुरु राजेन्द्र भुङ्क्ष्व भोगान्मया सह ॥१७७
इत्युक्तः स तु तामाह कलिकाले समागते। जीवनान्मरणं श्रेष्ठं तस्मान्मद्वचनं कुरु ॥१७८
हरिनागरमारुह्य मया सार्द्धं शुभानने। गत्वा तीर्थानि रम्याणि सन्त्यजामि कलेवरम् ॥१७९
इत्युक्त्वा तौ समारूह्य पूर्वे च कपिलान्तिकम्। गत्वा स्नात्वा च विधिवत्ततोऽग्रे जग्मतुर्मुदा ॥१८०
पृथक्पृथक्सुतार्थानि स्नात्वा दत्त्वा च जग्मतुः। दक्षिणे सेतुबन्धान्ते पश्चिमे द्वारिकामनु ॥१८१
उत्तरे बदरीस्थाने स्नात्वा तीर्थानि जग्मतुः। गन्धमादनमागत्य ब्रह्मानन्दो महाबलः ॥१८२

---

उन्हें भी धराशायी कर दिया। उस समय तारक (ताहर) धुंधुकार (धांधु) और चामुण्ड (चौंढ़ा) ब्रह्मानन्द को छोड़कर पृथ्वीराज के पास चले गये। तीनों पुत्रों के हनन होने पर भयभीत होकर पृथ्वीराज ने वेला के पास पहुँच अत्यन्त कारुणिक रुदन किया। इसे सुनकर उसी समय वेला ने डोला पर बैठकर अतिशीघ्र ब्रह्मानन्द के पास पहुँचकर उन्हें उसी मूर्च्छित अवस्था में देखा। पश्चात् वह मृतक अपने छोटे भाइयों को उठाकर रुदन करने लगी। उस समय ब्रह्मानन्द की आँख खुल गई, रुदन करती हुई उस सुन्दरी को देखकर उससे उन्होंने पूँछा इस युद्ध में तुम मेरे पास आई हो, तो बताओ तुम किसकी पुत्री

वेलामुवाच वचनं भाद्रशुक्लाष्टमीदिने । देहं त्यजामि भो राज्ञि तारकं जहि भूतले ॥१८३
इति श्रुत्वा तु सा प्राह स्वामिन्मद्वचनं कुरु । कुरुक्षेत्रं मया सार्द्धं भवान्वै गन्तुमर्हति ॥१८४
स्थित्वा तत्र समस्वान्तो भजत्वं सर्वमङ्गलाम् । अहं महावतीं प्राप्य पुनर्वै देहलीं प्रति ॥१८५
तारकं च तथा हत्वा त्वत्समीपं व्रजाम्यहम् । इत्युक्तः स तथेत्युक्त्वा ब्रह्मध्यानपरोऽभवत् ॥१८६

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयो नामैकत्रिंशोऽध्यायः ।३१

# अथ द्वात्रिंशोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

द्वात्रिंशाब्दे च कृष्णांशे सम्प्राप्ते योगरूपिणी । वेला नाम शुभा नारी हरिनागरसंस्थिता ॥
महावतीं समागम्य सभायां तत्र चाविशत् ॥१
एतस्मिन्नन्तरे प्राप्ताः कृष्णांशाद्या महाबलाः । नत्वा परिमलं भूपं वेला वचनमब्रवीत् ॥२
महीपतिं प्रियं मत्वा कृष्णांशं नृपदुष्प्रियम् । त्वया मे घातितो भर्ता ब्रह्मानन्दो महाबलः ॥३

---

'रानी ! आज भाद्रशुक्ल की अष्टमी के इस शुभ अवसर पर मैं अपने शरीर का त्याग करना चाहता हूँ, तुम पृथ्वी में रहकर तारक (ताहर) का वध अवश्य करना'। इसे सुनकर उसने विनम्र प्रार्थना की—स्वामिन् ! मेरी एक बात स्वीकार करने की कृपा करें। आप मेरे साथ कुरुक्षेत्र चलकर वहाँ रहकर ही अपने मंगल की कामना करते रहें और मैं वहाँ से महावती (महोवा) जाकर वहाँ से पुनः दिल्ली लौटने पर तारक (ताहर) का वध करके आपके पास आ जाऊँगी। इसे सुनकर उन्होंने वेला की बात

महीराजसुतैर्धूर्तैस्तारकाद्यैर्महाबलैः । नारीवेषं च चामुण्डो धुन्धुकारेण कारितः ।।४
स्वामिनं प्रति चागम्य ते जग्मुश्छद्मना प्रियम् । कुरुक्षेत्रे स्थितः स्वामी महत्या मूर्छयान्वितः ।।
तस्माद्यूयं मया सार्द्धं गन्तुमर्हथ तं प्रति ।।५
इति घोरतमं वाक्यं श्रुत्वा सर्वे शुचान्विताः । धिग्भूपतिं च मलनां ताभ्यां नो घातितः सखा ।।६
इत्युक्त्वोच्चैश्च रुरुदुः कृष्णांशाद्या महाबलाः । पत्राणि प्रेषयामासुः स्वकीयान्भूपतीन्प्रति ।।७
क्रोधयुक्ता तदा वेला लिखित्वा पत्रमुल्बणम् । महीराजाय सम्प्रेष्य मलनागेहमागमत् ।८
तत्पत्रं च महीराजो वाचयित्वा विधानतः । ज्ञात्वा तत्कारणं सर्वं तन्निशम्य विशाम्पतिः ।।९
चिन्ताकलेवरं प्राप्य सुखनिद्रां व्यनाशयत् । आहूय भूपतीन्सर्वान्घोरयुद्धोन्मुखोऽभवत् ।।१०
चतुर्विंशतिलक्षैश्च शूरैर्भूपसमन्वितैः । कुरुक्षेत्रं ययौ शीघ्रं धृतराष्ट्रांशसम्भवः ।।११
तथा परिमलो भूपो लक्षषोडशसैन्यपः । द्रुपदांशो ययौ शीघ्रं वेलया स्वकुलैः सह ।।१२
स्यमन्तपञ्चके तीर्थे शिबिराणि चकार ह । ब्रह्मानन्दः स्थितो यत्र समाधिध्यानतत्परः ।।१३
गङ्गाकूले च ते सर्वे कौरवांशा महाबलाः । शिबिराणि विचित्राणि चक्रुस्तेविजयैषिणः ।।१४
कृत्वा ते कार्तिकीस्नानं दत्त्वा दानान्यनेकशः । मार्गकृष्णद्वितीयायां युद्धभूमिमुपाययुः ।।१५
विष्वक्सेनीयभूपालो लहरस्तत्र चागतः । कौरवांशाश्च तत्पुत्राः षोडशैव महाबलाः ।।
पूर्वजन्मनि यन्नाम तन्नाम्ना प्रथिता इह ।।१६

---

स्त्री का वेष बनाकर मेरे स्वामी के पास ले गया । वहीं सब लोगों ने मिलकर कपट द्वारा मेरे सौभाग्य का नाश किया है । इस समय मूर्च्छित अवस्था में पतिदेव कुरुक्षेत्र के स्थल में पड़े हुए हैं, अतः तुम लोग मेरे साथ शीघ्रातिशीघ्र वहाँ चलने की तैयारी करो ।' इस अत्यन्त कठोरवाणी को सुनकर उदयसिंह आदि महावली वीरगण राजा परिमल और उनकी रानी मलना को धिक्कारते हुए 'तुम्ही दोनों ने मेरे मित्र का

दुस्सहो दुश्शलश्चैव जलसन्धः समः सहः । विन्दस्तथानुविन्दश्च सुबाहुर्दुष्प्रधर्षणः ॥१७
दुर्मर्षणश्च दुष्कर्णः सोमकीर्तिरनूदरः । शलः सत्त्वो विवित्सुश्च क्रमाज्ज्ञेया महाबलाः ॥१८
तोमरान्वयभूपालो बाह्लीकपतिरागतः । त्रिलक्षैश्च तथा सैन्यैः सप्तपुत्रैश्च भूपतिः ॥१९
चित्रोपचित्रौ चित्राक्षश्चारुश्चित्रः शरासनः । सुलोचनः सवर्णश्च पूर्वजन्मनि कौरवाः ॥२०
तेषामंशाः क्रमाज्जाता अभिनन्दनदेहजाः । महानन्दश्च नन्दश्च परानन्दोपनन्दकौ ॥
सुनन्दश्च सुरानन्दः प्रनन्दः कौरवांशकः ॥२१
नृपः परिहरवंशीयो मायावर्मा महाबली । लक्षसैन्ययुतः प्राप्तो दशपुत्रसमन्वितः ॥२२
दुर्मदो दुर्विगाहश्च नन्दश्च विकटाननः । चित्रवर्मा सुवर्मा च सुदुर्मोचन एव च ॥२३
ऊर्णनाभः सुनाभश्च चोपनन्दश्च कौरवाः । तेषामंशः क्रमाज्जाताः सुता अङ्गपतेः स्मृताः ॥२४
मत्तः प्रमत्त उन्मत्तः सुमत्तो दुर्मदस्तथा । दुर्मुखो दुर्द्धरो वायुः सुरथो विरथः क्रमात् ॥२५
शुक्लवंशीयभूपालो मूलवर्मा समागतः । लक्षसैन्यैश्च बलवान्दशपुत्रसमन्वितः ॥२६
अयोबाहुर्महाबाहुश्चित्राङ्गश्चित्रकुण्डलः । चित्रायुधो निषङ्गी च पाशी वृन्दारकस्तथा ॥२७
दृढवर्मा दृढक्षत्रः पूर्वजन्मनि कौरवाः । तेषामंशा महीं जाता गृहे ते मूलवर्मणः ॥२८
बलश्च प्रबलश्चैव सुबलो बलवान्बली । सुमूलश्च महामूलो दुर्गो भीमो भयङ्करः ॥२९
कैकयश्चन्द्रवंशीयो लक्षसैन्यसमन्वितः । दशपुत्रान्वितः प्राप्तः कुरुक्षेत्रे महारणे ॥३०
भीमवेगो भीमबलो बलाकी बलवर्द्धनः । उग्रायुधो दण्डधरो दृढसन्धो महीधरः ॥३१
जरासन्धः सत्यसन्धः पूर्वजन्मनि कौरवाः । तेषामंशाः समुद्भूताः कैकयस्य गृहे शुभे ॥३२
कामः प्रकामः सङ्क्रामो निष्कामो निरपत्रपः । जयश्च विजयश्चैव जयन्तो जयवाञ्जयः ॥३३

---

इसी जन्म में भी पड़े हुए थे—दुस्सह, दुश्शल, जलसंध, समःसह, विंद, अनुविंद, सुबाहु, दुष्प्रधर्षण, दुर्मर्षण,
दुष्कर्ण, सोमकीर्ति, अनूदर, शल, सत्त्व, और विवित्सु क्रमशः उन महाबलवानों के नाम थे। बाह्लीक

नागवंशीयभूपालो नागवर्मा समागतः । लक्षसेनान्वितः प्राप्तो दशपुत्रसमन्वितः ॥३४
पूर्वजन्मनि यन्नाम्ना तन्नाम्ना कौरवा भुवि । पुण्ड्रदेशपतेः पुत्रा जाता दश शिवाज्ञया ॥३५
उग्रश्रवा उग्रसेनः सेनानीर्दुष्परायणः । अपराजितः कुण्डशायी विशालाक्षो दुराधरः ॥३६
दृढहस्तः सुहस्तश्च सुतास्ते नागवर्मणः ॥३७
मद्रकेशः समायातस्तोमरान्वयसम्भवः । लक्षसैन्यैर्युतो राजा दशपुत्रसमन्वितः ॥३८
वातवेगः सुवर्चाश्च नागदन्तोग्रयाजकः । आदिकेतुश्च वक्शी च कवची क्राथ एव च ॥३९
कुण्डश्च कुण्डधारश्च कौरवाः पूर्वजन्मनि । तन्नाम्ना भुवि वै जाता मद्रकेशस्य मन्दिरे ॥४०
नृपः शार्दूलवंशीयो लक्षसैन्यसमन्वितः । पूर्णामलो मागधेशो दशपुत्रान्वितो ययौ ॥४१
वीरबाहुर्भीरथश्चोग्रश्चैव धनुर्धरः । रौद्रकर्मा दृढरथोऽलोलुपश्चाभयस्तथा ॥४२
अनाधृष्टः कुण्डभेदी कौरवाः पूर्वजन्मनि । पूर्णामलस्य वै गेहे तन्नाम्ना भुवि सम्भवः[1] ॥४३
मङ्कणः किन्नरो नाम रूपदेशे महीपतिः । चीनदेशात्परे पारे रूपदेशःस्मृतो बुधैः ॥
नरः किन्नरजातीयो वसति प्रियदर्शनः ॥४४
मङ्कणश्च तदा प्राप्तः किन्नरायुतसंयुतः । अष्टपुत्रान्वितः प्राप्तो यत्र सर्वनृपाः स्थिताः ॥४५
विरावी प्रथमश्चैव प्रमाथी दीर्घरोमकः । दीर्घबाहुर्महाबाहुर्व्यूढोराः कनकध्वजः ॥४६
पूर्वजन्मनि यन्नाम्ना[2] तन्नाम्ना किन्नरा भुवि । विरजोंशश्च यो जातो मङ्कणो नाम किन्नरः ॥४७
नेत्रसिंहः समायातो लक्षसैन्यसमन्वितः । शल्यांशः स तु विज्ञेयः शार्दूलान्वयसम्भवः ॥४८

---

नागवंशीय राजा नागपाल अपनी एक लाख सेना और दश पुत्रों समेत आये थे, जो पूर्व जन्म के उग्रश्रवा, उग्रसेन, सेनानी, दुष्परायण, अपराजित, कुण्डशायी, विशालाक्ष, दुराधर, दृढ़हस्त तथा सुहस्त नामक

तदा गजपती राजा लक्षसैन्यसमन्वितः । सम्प्राप्तः शकुनेरंशस्त्यक्त्वा गेहे स्वपुत्रकान् ।।४९
मयूरध्वज एवापि लक्षसैन्यसमन्वितः । मकरन्दं गृहे त्यक्त्वा विराटांशः समागतः ।।५०
वीरसेनः समायातः कामसेनसमन्वितः । लक्षसेनान्वितस्तत्र चोग्रसेनांशसम्भवः ।।५१
लक्षणश्च समायातः सप्तलक्षबलैर्युतः । सन्त्यज्य पद्मिनीं नारीं महाकष्टेन भूपतिः ।।५२
तालनो धान्यपालश्च लल्लसिंहस्तथैव च । भीमस्यांशो युयुत्सोश्च कुन्तिभोजस्य वै क्रमात् ।।५३
आह्लादश्च[1] समायातः कृष्णांशेन समन्वितः । जयन्तेन च वै वीरो लक्षसैन्यान्वितो बली ।।५४
जगन्नायक एवापि शूरायुतसमन्वितः । सम्प्राप्तो भगदत्तांशो गौतमान्वयसम्भवः ।।५५
अन्ये च क्षुद्रभूपाश्च सहस्राढ्याः पृथक्पृथक् । कुरुक्षेत्रं परं स्थानं संययुर्मदविह्वलाः ।।५६
मूलवर्मा च नृपतिः सपुत्रो लक्षसैन्यपः । नृपं परिमलं प्राप्य संयुक्तो[2] देहलीपतेः ।।५७
कैकयो लक्षसेनाढ्यः सपुत्रो नृपतिः स्वयम् । नृपं परिमलं प्राप्य स युद्धार्थमुपस्थितः ।।५८
नेत्रसिंहश्च नृपतिः स वीरो लक्षसैन्यपः । मयूरध्वज एवापि लक्षपः शशिवंशिनम् ।।५९
वीरसेनश्च लक्षाढ्यः सपुत्रश्चान्द्रिपक्षगः । लक्षणः सप्तलक्षाढ्यो युद्धार्थं समुपस्थितः ।।६०
आह्लादो[3] लक्षसैन्याढ्यः पक्षगश्चन्द्रवंशिनः । द्विलक्षसंयुतो राजा चन्द्र[4]वंशो रणोन्मुखः ।।
एवं षोडशलक्षाढ्यः स्थितः परिमलो[5] रणे ।।६१

---

शार्दूल वंश में उत्पन्न हुए थे । शकुनि वंश राजा गजपति भी घर में पुत्रों को सौंपकर एक लाख सेना समेत वहाँ आये थे । विराटांश मयूरध्वज मकरंद को घर सौंपकर एक लाख सैनिक लिए वहाँ आये थे । उसी प्रकार उग्रसेनांश से उत्पन्न वीरसेन कामसेन समेत एक लाख सेना लेकर वहाँ पहुँचे थे । अत्यन्त कष्ट से पद्मिनी को छोड़कर राजा लक्षण (लाखन) सात लाख लेना समेत वहाँ आये थे । भीम, युयुत्स, और कुन्तिभोज के अंश से क्रमशः उत्पन्न तालन धान्यपाल, एवं लल्लसिंह, उदयसिंह और इन्दुल समेत एक

लहरो[1] भूपतिश्रेष्ठो लक्षपः पुत्रसंयुतः । महीराजमुपागम्य युद्धार्थं समुपस्थितः ॥६२
अभिनन्दन एवापि सपुत्रो लक्षसैन्यपः । मायावर्मा च नृपतिः सपुत्रो लक्षसैन्यपः ॥६३
नागवर्मा समायातः सपुत्रो लक्षसैन्यपः । मद्रकेशः सपुत्रश्च लक्षसैन्यो रणोन्मुखः ॥६४
पूर्णामलः सपुत्रश्च लक्षपश्चैव पक्षगः । मङ्कणः किन्नरो नाम सपुत्रस्तत्र संस्थितः ॥६५
गजराजः समायातो महीराजं हि लक्षपः । धुन्धुकारः समायातः पञ्चलक्षपतिः स्वयम् ॥६६
पुत्रः कृष्णकुमारस्य भगदत्तः समागतः । त्रिलक्षबलसंयुक्तो महीराजं महीपतिम् ॥६७
दलवाहनपुत्रश्च देशगोपालसंस्थितः । अङ्गदस्तत्र सम्प्राप्तः सायुतो देवकीप्रियः ॥
महीराजमुपागम्य युद्धार्थं समुपस्थितः ॥६८
कलिङ्गश्च नृपः प्राप्तस्त्रिकोणश्च तथैव च । श्रीपतिश्च तथा राजा श्रीतारश्च तथा गतः ॥६९
मुकुन्दश्च सुकेतुश्च रुहिलो गुहिलस्तथा । इन्दुवारश्च बलवाञ्जयन्तश्च तथाविधः ॥
सर्वे दशसहस्राढ्या महीराजमुपस्थिताः ॥७०
महीराजस्य पक्षे तु सहस्रं क्षुद्रभूमिपाः । ते तु साहससेनाढ्या महीराजमुपस्थिताः ॥७१
तेषां मध्ये च वै भूपान्द्विशतान्देहलीं प्रति । ससैन्यान्प्रेषयामास राज्यरक्षणहेतवे ॥
एवं स देहलीराजश्चतुर्विंशतिलक्षपः ॥७२
युद्धमष्टादशाहानि सञ्जातं सर्वसंक्षयम् । शृणु युद्धकथां रम्यां भृगवर्य सुविस्तरात् ॥७३
मार्गकृष्णद्वितीयायां महीराजो महाबलः । आहूय लहरं भूपं वचनं प्राह निर्भयः ॥७४
भवान्सपुत्रः सेनाढ्यो धुन्धुकारेण रक्षितः । चामुण्डेन युतो युद्धे गन्तुमर्हति सत्तम ॥

---

तैयारी किया था । उसी प्रकार राजा पृथ्वीराज के समीप उनकी सहायतार्थ नृपश्रेष्ठ, लहर, मायावर्मा,
नागवर्मा, मद्रकेश, पूर्णामल अपने अपने पुत्रों और एक-एक लाख सैनिकों समेत वहाँ आये थे । पुत्र तथा

इति श्रुत्वा ययौ शीघ्रं कुरुक्षेत्रे महारणे ॥७५
तदा परिमलो राजा मयूरध्वजमेव हि । समाहूय वचः प्राह शृणु पार्थिवसत्तम ॥७६
कृष्णांशेन जयन्तेन देवसिंहेन रक्षितः । स भवाल्लँक्षसैन्याढ्यो गन्तुमर्हति वै रणे ॥७७
इति श्रुत्वा तु वचनं मयूरध्वज एव हि । लक्षसैन्यान्वितः प्राप्तो लहरं नृपतिं प्रति ॥७८
तयोश्चासीन्महद्युद्धं सेनयोरुभयो रणे । सेना तु लक्षवीरस्य तत्र युद्धे प्रकीर्तिता ॥७९
एको रथो गजास्तत्र ज्ञेयाः पञ्चशतं रणे । हयाश्च पञ्चसाहस्रा पत्तयस्तद्‌गुणा दश ॥
एते सैन्या नरा ज्ञेया सैन्यपांश्च शृणुष्व भोः ॥८०
दशानां पच्चराणां च पतिर्नाम्ना स पत्तिपः । पञ्चानां च हयानां च पतिर्नाम्ना स गुल्मपः ॥८१
पञ्चानां च गजानां च पतिर्नाम्ना गजाधिपः । एतैः सार्द्धं रथी ज्ञेयो रणेऽस्मिन्दारुणे कलौ ॥८२
उष्ट्रारूढाः स्मृता दूताश्चत्वारिंशच्च तद्बले । शतघ्न्यस्तत्र साहस्रास्तेषां मध्ये पृथक्पृथक् ॥
षट्‌त्रिंशद्वै पदचरास्तेषां कर्माणि मे शृणु ॥८३
दशगोलकदातारो दशतत्पुष्टिकारकाः । दश चार्द्रकरास्ता वै त्रयस्ते वह्निदायिनः[१] ॥
त्रयो दृष्टिकरा ज्ञेयास्त्रियामेषु पृथक्पृथक् ॥८४
शेषाः शूद्रास्तु सेनानां शूरकृत्यपरायणाः । एवं च लक्षवीराणां सेना तत्र प्रकीर्तिता ॥८५

---

जाने की तैयारी कीजिये । इसे सुनकर ही उन लोगों के साथ शीघ्र उस रणस्थल में पहुँच गये ।५६-७५। उस समय राजा परिमल ने मयूरध्वज को बुलाकर कहा—नृपश्रेष्ठ ! उदयसिंह, जयन्त (इन्दुल), और देवसिंह द्वारा सुरक्षित होकर आप अपने एक लाख सैनिकों समेत वहाँ युद्ध भूमि मे पहुँच जाँय । इसे सुनकर मयूरध्वज ने एक लाख सेना लेकर वहाँ रणभूमि में पहुँचकर राजा लहर के साथ घोर संग्राम आरम्भ किया । उस रणभूमि में दोनों सेनाओं का अत्यन्त भीषण युद्ध हुआ । उस युद्ध में उपस्थित एक

तत्रासीत्तुमुलं युद्धं धर्मेण च समन्ततः । प्रातःकालात्समारभ्य मध्याह्नं सैन्ययोर्द्वयोः ॥८६
तत्पश्चाद्याममात्रेण सैन्यपा युद्धमागताः । तत्पश्चाच्च महाशूरा धुन्धुकारादयो बलाः[1] ॥८७
याममात्रं च युद्धाय संस्थिता रणमूर्धनि । चामुण्डेन च कृष्णांशो धुन्धुकारेण चेन्दुलः ॥८८
भगदत्तेन वै देवः कृतवान्युद्धमुत्तमम् । सायङ्काले तु सम्प्राप्ते सर्वे शूराः क्षयं[2] गताः ॥८९
कृष्णांशस्तत्र चामुण्डं जित्वा तु लहरात्मजान् । षोडशैव जघानाशु घटीमात्रेण वीर्यवान् ॥
दध्मौ शङ्खं प्रसन्नात्मा लक्षणान्तमुपाययौ ॥९०
चामुण्डो धुन्धुकारश्च भगदत्तो युतः शतैः । महीराजमुपागम्य सुषुपुर्निशि निर्भयाः ॥९१
इन्दुलो देवसिंहश्च सहस्रै संयुतौ मुदा । गत्वा परिमलं भूपं रात्रौ सुषुपतुस्तदा ॥९२
प्रातःकाले तु संप्राप्ते तृतीयायां भयङ्करे । महीराजस्तदाहूय नृपं गजपतिं बली ॥९३
वचनं प्राह भो राजँस्त्वं त्रिवीरैः सुरक्षितः । स्वकीयैर्लक्षसैन्यैश्च गन्तुमर्हसि वै रणे ॥९४
तदा परिमलो भूपो नेत्रसिंहं महीपतिम् । युद्धायाज्ञापयामास कृष्णांशाद्यैः सुरक्षितम् ॥९५
तयोश्चासीन्महद्युद्धं सेनयोरुभयोः क्रमात् । हया हयैः क्षयं जग्मुर्गजाश्चैव तथा गजैः ॥
पञ्चराः पञ्चरैः सार्द्धं शतघ्न्यश्च शतघ्निभिः ॥९६
अपराह्णे मुनिश्रेष्ठ नेत्रसिंहो महाबलः । महागजं गजपतिं गत्वा युद्धमचीकरत् ॥९७

---

विशेष विवरण बताया गया है, जो उस रणक्षेत्र में धार्मिक युद्ध कर रहे थे। प्रातः काल से आरम्भ कर मध्याह्न तक दोनों सैनिकों का भीषणयुद्ध होकर बन्द सा हो जाता था। तत्पश्चात् एक प्रहर के लिए सैन्यपति लोग वहाँ युद्धार्थ उपस्थित होते थे। इस प्रकार मयूरध्वज और लहर के उस रणभूमि में सैनिकों से युद्ध करने के उपरांत बली एवं महाशूर धुंधुकार (धांधू) आदि वीरगण वहाँ एक प्रहर के युद्धार्थ उपस्थित हुए। [illegible]

परस्परं च विरथौ सञ्छिन्नधनुषौ तदा । खड्गहस्तौ महीं प्राप्य चक्रतू रणमुल्बणम् ॥
अन्योन्येन वधं कृत्वा स्वर्गलोकमुपागतौ ॥९८
इन्दुलस्तं तु चामुण्डं देवो वै धुन्धुकं तथा । कृष्णांशो भगदत्तं च जित्वा राजानमाययुः ॥९९
शेषैः पञ्चशतैः शूरैस्तैः सार्द्धं लक्षणं प्रति। पराजिताश्च ते सर्वे सहस्रैः सहिता ययुः ॥१००
प्रातःकाले तु सम्प्राप्ते महीराजो महाबलः । मायावर्माणमाहूय वचनं प्राह निर्भयः ॥१०१
भवान्दशसुतैर्वीरैर्लक्षसैन्यैश्च संयुतः । सर्वशत्रुविनाशाय गन्तुमर्हति सत्तम ॥
इति श्रुत्वा स नृपतिर्वाद्यान्संवाद्य चाययौ ॥१०२
दृष्ट्वा परिमलो भूपो मायावर्माणमागतम् । जगन्नायकमाहूय वचनं प्राह निर्भयः ॥१०३
भवान्दशसहस्रैश्च सार्द्धं तैस्त्रिभिरन्वितः । गन्तुमर्हति युद्धाय शीघ्रं मद्विजयं कुरु ॥१०४
इति श्रुत्वा ययौ शीघ्रं सेनयोरुभयोर्महत् । युद्धं चासीन्मुनिश्रेष्ठ याममात्रं भयानकम् ॥१०५
हतास्ते दशसाहस्राः कृष्णांशाद्यैः सुरक्षिताः । शङ्खान्दध्मुश्च ते सर्वे चाङ्गदेशनिवासिनः ॥१०६
एतस्मिन्नन्तरे धीराः कृष्णांशाद्यस्तुरीयकाः[1] । याममात्रेण सञ्जघ्नुर्लक्षसैन्यं रिपोस्तदा ॥१०७
अपराह्णे महाराजो मायावर्मा सुतैः सह । कृष्णांशं देवसिंहं च सम्प्राप्तो जगनायकम् ॥१०८

अथाङ्गभूपं दशपुत्रयुक्तं कृष्णांश एवाशु जगाम शीघ्रम् ।
हयस्थितो वीरवरः प्रमाथी कलैकजातो मधुसूदनस्य ॥१०९

---

काय गजपति के साथ युद्धारम्भ किया । युद्ध में उन दोनों ने पहले विरथ होकर एक दूसरे के धनुष -वाण काटते हुए अपने-अपने खड्ग द्वारा महाविषम युद्ध किया । पश्चात् अपने रण-कौशल से एक दूसरे के वध करके वे दोनों स्वर्गीय हो गये । इधर इन्दल ने चामुण्ड (चौंढा) देवसिंह ने धुंधुकार (धांधु) और उदयसिंह ने भगदत्त को पराजित कर राजा के पास प्रस्थान किया, जिसमें उनलोगों के साथ शेष पाँच सौ शूर सैनिक जा रहे थे । पराजित होने पर भगदत्त आदि के पास भी सहस्रों सैनिक थे । तीसरे दिन प्रातः

ततोङ्गभूपस्त्रिभिरेव बाणैरताडयन्मूर्धिन च पार्श्वयोर्वै ।
अमर्षमाणो बलवान्महीपतिदण्डैर्हतः काल इवाशु सर्पः ॥११०
हयं समुड्डीय स पुष्करान्तं ततोभ्यगात्तं नृपतिं रथस्थम् ।
हयस्य पातैर्विरथीचकार स एव भूपोऽसिमुपाददानः ॥१११
स्वेनासिना बिन्दुलमङ्गशल्यं कृत्वा स कृष्णांशमुवाच वाक्यम् ।
कल्लोलमायात्तव नाशनाय त्वयाजिता भूपतयःप्रधानाः ॥११२
तदैव कीर्तिर्भविता ममाशु हत्वा भवन्तं च सुखी भवामि ।
इत्युक्तवन्तं नृपतिं महान्तं स्वेनासिना तस्य शिरो जहार ॥११३
हतेऽङ्गभूपे दश तस्य पुत्रास्तमेव जग्मुर्युधि कौरवांशाः ।
तानागतानिन्दुल एव पञ्च जघान बाणैस्तु तदा समन्युः ॥११४
उभौ च देवस्तु जघान तत्र भल्लेन सिद्धेन नृपात्मजौ च ।
ज्येष्ठं सुतं गौतम एव हत्वा द्वौ यौ स कृष्णांश उपाजघान ॥११५
शङ्खान्प्रदध्मूरुचिराननास्ते प्रदोषकाले शिबिराणि जग्मुः ।
श्रमान्वितास्ते सुषुपुर्निशायां प्रातः समुत्थाय स्वकर्म कृत्वा ॥११६
गत्वा सभायां नृपतिं प्रणम्य वाक्यं समूचुः शृणु चन्द्रवंशिन् ।
अद्यैव सेनापतिरस्ति को वै चाज्ञापयास्मान्नृप तस्य गुप्त्यै ॥११७
श्रुत्वाह भूपोऽद्य तु वीरसेनः सकामसेनः स्वबलैः समेतः ।
रणं करिष्यत्यचिरेण वीरास्तस्मात्सुरक्षध्वमरिभ्य एव ॥११८

स वीरसेनो नृपतिं प्रणम्य लक्षैः स्वसैन्यैर्युधि सञ्जगाम ।
तदा महीराजनृपः प्रतापी स नागवर्माणमुवाच तापी ॥११९
रणाय गच्छाशु सुतैः समेतो लक्षैः स्वसैन्यैरुत भूपवर्य ।
हत्वा रिपुं घोरतमं हि वीरं पतिं महान्तं युधि वीरसेनम् ॥१२०
इत्युक्तवन्तं नृपतिं प्रणम्य सुवादयामास तदा हि वीरः ।
तयोर्बभूवाशु रणो महान्वै सुसेनयोः सङ्कुलयुद्धकर्त्रोः ॥१२१
त्रियाममात्रेण हताश्च सर्वे विमानमारुह्य ययुश्च नाकम् ।
हतेषु सर्वेषु च नागवर्मा सुतेषु वै यादवभूपमाह ॥१२२
भवान्विसैन्यश्च तथैव चाहं भवान्सपुत्रश्च तथाहमेव ।
संस्मृत्य धर्मं कुरु युद्धमाशु ततो रथस्थः सुधनुर्गृहीत्वा ॥१२३
बाणैश्च बाणान्भुवि तौ च छित्त्वा बभूवस्तुस्तौ विरथौ नृपाग्र्यौ ।
खड्गेन खड्गं च तथैव छित्त्वा विमानमारुह्य गतौ हि नाकम् ॥१२४
स कामसेनः स्वरिपोश्च पुत्राञ्जघान बाणैश्च तदाष्टसङ्ख्यान् ।
ज्येष्ठौ तदा कोपसमन्वितौ तं गृहीतखड्गौ च समीयतुश्च ॥१२५
रिपोः शिरो जह्रतुरुग्रवेगौ सकामसेनश्च कबन्ध एव ।
हत्वा रिपू तौ च तदा मिलित्वा स्वर्गं ययुस्ते च विमानरूढाः ॥१२६
हतेषु सर्वेषु तदा त्रयस्ते चामुण्डकाद्या जगनायकं ते ।
रुद्ध्वः समेताः स्वशरैः कठोरैर्जघ्नुस्तमश्वं हरिनागरं च ॥१२७

---

सावधान रहना । जिस समय वीरसेन ने राजा परिमल के नमस्कार पूर्वक अपने सैनिकों समेत उस
[illegible] में प्रस्थान किया, उस प्रतापी राजा पृथ्वीराज ने नागवर्मा को बुलाकर कहा—नृपश्रेष्ठ ! अपने

स दिव्यवाजी च तदा स्वपक्षौ प्रसार्य्य खेनाशुरिपुं जगाम।
स धुन्धुकारस्य गजं विहत्य चामुण्डकस्यैव गजं विमर्द्य ॥१२८
रथं च भूमौ भगदत्तकस्य विचूर्ण्य शीघ्रं च नभो जगाम।
प्रवाद्य शङ्खं जगनायकश्च कृष्णांशमागम्य कथां चकार ॥१२९
निशामुषित्वा जगनायकाद्याः प्रातः समुत्थाय रणं प्रजग्मुः।
तदा महीराज उताशुकारी स किन्नरेशं कणकं सपुत्रम् ॥१३०
उवाच राजञ्छृणु किन्नराणां महाबलास्ते रिपवो ममैते।
विनाशयाशु प्रबलारिघातान्देवैर्न सार्द्धं युधि वै मनुष्याः[1] ॥१३१
इत्युक्तवान्मङ्कणभूपतिस्तु ययौ सपुत्रोऽयुतसैन्यपश्च।
तमागतं तत्र विलोक्य राजा वीरान्स्वकीयांश्च समादिदेश ॥१३२
मनोरथस्थो जगनायकश्च स तालनो वै वडवां विगृह्य।
करालसंस्थश्च तदा जयन्तो विगृह्य चापं तरसा जगाम ॥१३३
पपीहकस्थश्च स रूपणो वै जगाम कृष्णांशसमन्वितश्च।
स लल्लसिंहो गजमत्तसंस्थः स धान्यपालो हयमारुरोह ॥१३४
समन्ततः किन्नरसैन्यघोरं विनाशयामासुरुपांशुखड्गैः।
विनश्यमाने त्रिसहस्रसैन्ये स किन्नरेशस्तरसा जगाम ॥१३५
ध्यात्वा कुबेरं च गृहीतचापो नभोगतस्तत्र बभूव सूक्ष्मः ॥१३६

---

तदुपरांत उस दिव्य अश्व ने अपने पंख फैलाकर ऊपर नभ में जाकर पुनः लौटकर धुंधुंकार (धांधू) और चामुण्ड (चौढ़ा) के गज का मर्दन करते हुए भगदत्त के रथ को चकनाचूर कर दिया और स्वयं आकाश में [illegible] गया। उस समय जगनायक ने अपने विजय शंख की ध्वनि करते हुए उदयसिंह के पास आकर उनसे

अदृश्यमानः स्वशरैः कठोरैर्विनर्द्य सर्वान्हि ननर्द घोरम् ।
विलप्यमाने च समस्तशूरे जयन्त एवाशु जगाम शत्रुम् ॥१३७
ध्यात्वा महेन्द्रं कणकं च बद्ध्वा कृष्णांशमागम्य पदौ ननाम ।
तदा तु ते शत्रुसहस्रसैन्ये निशम्य बद्धं कणकं निजेन्द्रम् ॥१३८
विनर्द्य घोरं रुरुधुश्च सर्वान्मायाविनो गुह्यकमस्त्रमूहुः ।
दिनेषु सप्तेषु[1] तथा निशासु बभूव युद्धं च समन्ततस्तैः ॥१३९
श्रमान्विताः सप्त महाप्रवीरा हतेषु सर्वेषु सुषुपुश्च वै यदा[2]।
तदा कुबेरं कणकश्च ध्यात्वा लब्ध्वा वरं बन्धनमाशु छित्त्वा ॥१४०
सुप्तान्समुत्थाय च सप्त शूरान्निशीथकाले स चकार युद्धम् ।
जित्वा च तान्षट् स वरप्रभावात्तदेन्दुलेनैव रणं चकार ॥१४१
गृहीतखड्गौ रणघोरमत्तौ हत्वा ततो वै भुवि चेयतुश्च ।
प्रजग्मतुर्नाकमुपान्तदेवौ संस्तूयमानौ सुरसत्तमैश्च ॥१४२
ततः प्रभाते विमले विजाते रुरोद रामांश उताललाप ।
पापैः कलापैः परिपीड्यमानः कुलान्वितः सर्वयुतो मुनीन्द्र ॥१४३
स पञ्चशब्दं गजमारुरोह त्रिलक्षसैन्यैस्तरसा जगाम ।
तदा महीराज उताह शृण्वन्गच्छध्वमद्यैव मया समेताः ॥१४४

---

करना आरम्भ किया उसकी घोर गर्जना एवं कठोर प्रहार से त्रस्त होकर वे सब विलाप करने लगे । उसी समय शूरप्रवर इंदुल वहाँ शत्रु के सम्मुख पहुँच गया ।१२७-१३६। उसने महेन्द्र के ध्यानपूर्वक मंकण को

स्वपञ्चलक्षैः प्रबलैश्च शूरैः सार्द्धं रुरोधाशु रिपोश्च सेनाम् ।
तयोर्बभूवाशु रणः प्रघोरो विनर्दतोर्युद्धनिमित्तमाशु ।।१४५
त्रियाममात्रेण हताश्च सर्वे द्वयोश्च पक्षा बलशालिनश्च ।
तदा महीराज उतायया वै समण्डलीकश्च धनुर्विगृह्य ।।१४६
स धुन्धुकारश्च तदा जगाम रथस्थितं लक्षणमुग्रवीरम् ।
तदोदयो वै भगदत्तमेव चामुण्डकं भीष्मकराजसूनुः ।।१४७
स पञ्चशब्दं गजमास्थितो वै गतः स एवाशु जगाम भूपम् ।
धनुर्विगृह्याशुगमुल्बणं च नृपस्थितश्चाथ भयङ्करं च ।।१४८
गजं प्रमत्तं शिवदत्तमुग्रमाह्लादहन्तारमुवाच वाक्यम् ।
अये प्रमत्ताग्रगजेन्द्रशूर जयं च मे देहि शिवप्रदत्त ।।१४९
स मण्डलीको रणदुर्मदश्च रामांश आह्लाद इति प्रसिद्धः ।
तस्माच्च मां रक्ष जवेन हस्तिन्महाबलात्काल रसाच्च वीरात् ।।१५०
इत्येवमुक्तो नृपतिं स हस्ती वचस्तमाहाशु शृणुष्व राजन् ।
यावदहं वै तनु जीवधारी तावद्भवाञ्छत्रुभयङ्करश्च ।।१५१
इत्युक्तवन्तं च गजं प्रमत्तं स पञ्चशब्दश्च तदा स्वदन्तैः ।
मुखं चतुर्भिश्च विदार्य शत्रोर्ननर्द घोरं स महेन्द्रदत्तः ।।१५२
स रुद्रदत्तश्च गजः प्रमत्तो रुषान्वधावत्तरसा गजेन्द्रम् ।
रिपुं स्वपद्भ्यां च चखान कुम्भैः स्वतुण्डदण्डेन तुदं[1] प्रकुर्वन् ।।१५३

---

समेत वहाँ पहुँचकर शत्रु की सेना को चारों ओर से घेर लिया । वे दोनों सैनिक उस रणस्थल में सिंहनाद

अवाप मूर्च्छां च स पञ्चशब्दस्तदाशु भूपं प्रति मण्डलीकः।
स्वतोमरेणाङ्गव्रणं प्रदाय खड्गेन हत्वा गजराजमुग्रम्॥
जगामपद्भ्यां स रिपुप्रमाथी यत्र स्थितश्चेन्दुल उग्रधन्वा ॥१५४
उत्थाप्य पुत्रं च विलप्यमानां पत्नीं स्वकीयां प्रति चाजगाम।
तदा प्रमत्तौ च गजौ सुमूर्च्छां त्यक्त्वा पुनश्चक्रतुरेव युद्धम्॥१५५
स लक्षणः खड्गवरेण बाणान्रिपोश्च छित्त्वा निजवैष्णवास्त्रम्।
दधार चापे च सुमन्त्रयित्वा सधुन्धुकारं च गजं ददाह॥१५६
हते च तस्मिन्निजमुख्यबन्धौ सभूमिराजश्च गृहीतचापः।
शरेण रौद्रेण च लक्षणं तं जघान तत्रादिभयङ्करस्थः॥१५७
स मूर्छितः शुक्लकुलेषु सूर्यस्तदोदयो वै भगदत्तमेव।
सुमूर्च्छयित्वा च जगाम शीघ्रं यत्र स्थितो लक्षण एकवीरः १५८
भयान्वितस्तं च विलोक्य राजा जवेन दुद्राव च रक्तबीजम्।
तदा सुदेवं च स रक्तबीजो जित्वा तु कृष्णांशयुतं जगाम॥१५९
बाणेन शीघ्रं स च मूर्च्छयित्वा पुनश्च देवं च स मूर्च्छयित्वा।
तद्बन्धनायोद्यत आशुकारी स लक्षणस्तत्र तदा जगाम॥१६०
प्रधाय चापे च स वैष्णवास्त्रं प्रचोदयामास च रक्तबीजे।
तदा स सामन्तसुतो बलीयान्रणं विहायाशु विलोक्य सन्ध्याम्॥
भयान्वितः स्वैश्च युतो ययौ वै यत्र स्थिता भूपतयः सकोपाः।१६१

---

दिया। पंचशब्द नामक अपने गजेन्द्र के मूर्च्छित हो जाने पर आह्लाद (आल्हा) ने अपने तोमर अस्त्र द्वारा पृथ्वीराज के शरीर में महान व्रण (घाव) करने के अनन्तर उनके गजराज पर खड्ग का आघात

विलोक्य शत्रुं च स रत्नभानोः सुतो ययौ वै शिबिराणि युक्तः ।
निशम्य भूपः स च चन्द्रवंशी जयं स्वकीयं सुषुपुस्तु ते वै ।।
प्रातश्च काले स च चन्द्रवंशी विलोक्य शुक्लान्वयमाह भूपम् ।।१६२
अये गुर्जरदेशीय मूलवर्मन्सुतैः सह । लक्षसैन्यान्वितो भूत्वा गन्तुमर्हतु वै भवान् ।।१६३
इत्युक्तः स तु भूपालो युद्धभूमिमुपाययौ । महीराजाज्ञया प्राप्तो नाम्ना पूर्णामलो बली ।।१६४
दशपुत्रान्वितो युद्धे सैन्यलक्षेण संयुतः । तयोश्चासीन्महद्युद्धं यामद्वयमुपस्थितम् ।।१६५
हतेषु तेषु सर्वेषु तौ नृपौ ससुतैर्बलौ । अनोऽन्येन रणं कृत्वा यमलोकमुपागतौ ।।१६६
मार्गकृष्णचतुर्दश्यां प्रभाते विमले रवौ । कैकयो लक्षसेनाढ्यो दयापुत्रसमन्वितः ।।
लक्षणानुज्ञया प्राप्तस्तस्मिन्युधि भयानके ।।१६७
मद्रकेशस्तदा राजा दशपुत्रसमन्वितः । लक्षसैन्यान्वितस्तत्र यत्र युद्धं समन्वभूत् ।।
परस्परं हताः सर्वे दिनान्ते क्षत्रियारणे ।।१६८
पुनः प्रभाते विमले भगदत्तो महाबली । त्रिलक्षबलसंयुक्तो जगर्ज रणमूर्द्धनि ।।१६९
दृष्ट्वा तं लक्षणो वीरस्त्रिलक्षबलसंयुतः । चकार तुमुलं घोरंसेनया च स्वकीयया ।।१७०
अपराह्ले हताः सर्वे सैनिका नृपयोस्तदा । भगदत्तः स्वयं क्रुद्धो रथस्थो लक्षणं ययौ ।।१७१
लक्षणो रथमारुह्य स्वपितुः शत्रुजं नृपम् । त्रिभिर्वाणैश्च सन्तोद्य भल्लेन समताडयत् ।।१७२

---

देखकर रत्न भानु पुत्र लक्षण (लाखन) भी अपने शिविर में चले गये उस समय चन्द्रवंशी राजा परिमल ने अपनी विजय सुनकर हर्षित होते हुए उन लोगों के साथ शयन किया। प्रातःकाल नित्यकर्म समाप्ति के अनन्तर चन्द्रवंशी राजा परिमल ने चन्द्रवंशी एक राजा से कहा—अये गुजरात देश के अधीश्वर

भगदत्तस्तदा क्रुद्धो विरथं तं चकार ह । क्रुद्धवन्तं रिपुं घोरं लक्षणः खड्गपाणिकः ।।
हत्वा हयांस्तथा सूतं भगदत्तमुपाययौ ।।१७३
मर्दयित्वा च तच्चर्म च्छित्त्वा वर्म तदुद्भवम् । त्रिधा चकार बलवान्भगदत्तं रिपोस्सुतम् ।।१७४
सन्ध्याकाले हते तस्मिंल्लँक्षणस्त्वरयान्वितः । एकाकी शिबिरं प्राप्तो हस्तिन्युपरि संस्थितः ।।१७५
भगदत्ते हते तस्मिन्स राजा क्रोधमूर्छितः । स्वकीयान्सर्वभूपांश्च चामुण्डेन समन्वितान् ।।
प्रेषयामास युद्धाय मार्गे च प्रतिपद्दिने ।।१७६
अङ्गदश्च कलिङ्गश्च त्रिकोणः श्रीपतिस्तथा । श्रीतारश्च मुकुन्दश्च रुहिलो गुहिलस्तथा ।।१७७
सुकेतुर्नव भूपास्ते नवायुतबलैर्युताः । वाद्यानि वादयामासुस्तस्मिन्युद्धमहोत्सवे ।।१७८
दृष्ट्वा ताँल्लक्षणो वीरो राजभिश्च स्वकीयकैः । सार्द्धं जगाम युद्धाय तथा व्यूह्यायुधद्रिपून् ।।१७९
रुद्रवर्मा च नृपतिः शूरैर्दशसहस्रकैः । अङ्गदं वैरिणं मत्वा तेन सार्द्धमयुध्यत् ।।१८०
कालीवर्माऽयुतैस्सार्धं कलिङ्गं प्रत्ययुध्यत । वीरसिंहोऽयुतैस्सार्द्धं त्रिकोणं प्रत्ययुध्यत ।।१८१
ततोऽनुजः प्रवीरश्च श्रीपतिं सोऽयुतैस्सह । नृपः सूर्यो धरो वीरोऽयुताढ्यो बलवान्रणे ।
श्रीतारं नृपमासाद्य महद्युद्धमचीकरत् ।।१८२
वामनोऽयुतसंयुक्तो मुकुन्दं प्रति सोऽगमत् । गङ्गासिंहश्च बलवान्महिलं प्रति सायुतः ।।१८३
जल्लसिंहोऽयुतैस्सार्द्धं गुहिलं प्रति सोऽगमत् । त्रिशतानि ततो भूपाः सहस्राढ्याः पृथक्पृथक् ।।१८४
क्षुद्रभूपाः क्षुद्रभूपांस्त्रिशतानि समाययुः । अन्योऽन्येन हताः सर्वे कृत्वा युद्धं भयानकम् ।।१८५

---

समय क्रुद्ध होकर भगदत्त ने उन्हें रथहीन कर दिया । उस क्रुद्ध एवं चोर शत्रु को देखकर लक्षण (लाखन) ने अपने खड्ग द्वारा उनके घोड़े और सारथी के निधन करने के उपरांत उन भगदत्त का सामना किया । उस बलवान ने उसी खड्ग द्वारा शत्रुपुत्र भगदत्त के कवच और चर्म (ढाल) को छिन्न-भिन्न करते हुए

चामुण्डस्तु तदा दृष्ट्वा का मृतकान्सर्वभूपतीन् । लक्षणान्तमुपागम्य महद्युद्धं चकार ह ।।१८६
लक्षणो रक्तबीजं तं ज्ञात्वा ब्राह्मणसंमतम् । वैष्णवास्त्रं तदा तस्मै न ददौ तेन पीडितः ।।१८७
सायङ्काले तु सम्प्राप्ते लक्षणो हस्तिनीस्थितः । एकाकी शिबिरं प्राप्तश्चामुण्डं नृपमाययौ ।।१८८
द्वितीयायां प्रभाते च कृष्णांशो देवसंयुतः । शूरैर्दशसहस्रैश्च युद्धभूमिमुपाययौ ।।१८९
तारकश्च स चामुण्डो द्विलक्षबलसंयुतः । द्विशतैश्च तथा भूपैः सार्द्धं युद्धमुपस्थितौ ।।१९०
पुरस्कृत्य नृपान्सर्वान्ससैन्यौ बलवत्तरौ । तेषामनुस्थितौ युद्धे तत्र जातो महारणः ।।१९१
याममात्रेण तौ वीरौ हत्वा सर्वमहीपतीन् । लक्षसैन्यांस्तथा हत्वा संस्थितौ श्रमकर्षितौ ।।१९२
चामुण्डस्तारको धूर्तः सम्प्राप्तौ छिद्रदर्शिनौ । ताभ्यां श्रमान्विताभ्यां च चक्रतुस्तौ समं रणम् ।।१९३
तेषां त्रियाममात्रेण सम्बभूव महान्रणः । सायङ्काले तु सम्प्राप्ते कृष्णांशश्च निरायुधः ।।
तलप्रहारेण रिपुं मूर्च्छयामास वीर्यवान् ।।१९४
एतस्मिन्नन्तरे वीरस्तारको देवसिंहकम् । हयं मनोरथं हत्वाशङ्खशब्दमथाकरोत् ।।१९५
तच्छब्दात्स च चामुण्डस्त्यक्त्वा मूर्च्छां महाबलः । कृष्णांशस्य शिरः कायादपहृत्य च वेगवान् ।।
तयोर्गृहीत्वा शिरसी महीराजमुपाययौ ।।१९६
महीराजस्तु ते दृष्ट्वा परमानन्दनिर्भरः । दत्त्वा दानं द्विजातिभ्यो महोत्सवमकारयत् ।।१९७
लक्षणस्य तदा सैन्ये हाहाशब्दो महानभूत् । श्रुत्वा कोलाहलं तेषां ज्ञात्वा तौ च हतौ नृपः ।।

---

पास पहुँचकर उनसे महान् युद्ध किया । उसके द्वारा पीडित होने पर भी लक्षण (लाखन) ने उसे ब्राह्मण समझकर उसके ऊपर अपने वैष्णवास्त्र का प्रयोग नहीं किया । संध्या समय लक्षण (लाखन) हथिनी पर बैठे अकेले ही शिविर में पहुँचे और चामुण्ड (चौंडा) राजा पृथ्वीराज के पास ।

ब्रह्मानन्दस्तदा मूर्च्छां त्यक्त्वा वेलामुवाच ह ॥१९८
प्रिये गच्छ रणं शीघ्रं हरिनागरमास्थिता । मम वेषं शुभं कृत्वा तारकं जहि मा चिरम् ॥१९९
इति श्रुत्वा तु सा वेला रामांशेन समन्विता । सहस्रशूरसहिता युद्धभूमिमुपाययौ ॥२००
श्रुत्वा स लक्षणो वीरस्तालनेन समन्वितः । सैन्यैश्च दशसाहस्रैर्महीराजमुपाययौ ॥२०१
तृतीयायां प्रभाते च तारको बलवत्तरः । ब्रह्मानन्दं च तं मत्वा महद्युद्धमचीकरत् ॥२०२
रक्तबीजश्च चामुण्डो रामांशो बलवत्तरः । चकार दारुणं युद्धं तस्मिन्वीरसमागमे ॥२०३
याममात्रेण रामांशो हत्वा तस्य महागजम् । तच्छस्त्राणि तथा च्छित्त्वा मल्लयुद्धमचीकरत् ॥२०४
त्रियाममात्रेण तदा सायङ्काले समागते । ममन्थ भ्रातृहन्तारं स च वीरो ममार ह ॥२०५
तदा वेला महाशत्रुं तारकं बलवत्तरम् । छित्त्वास्त्राणि स्वखड्गेन शिरः कायादपाहरत् ॥२०६
चितां कृत्वा विधानेन सा देवी द्रुपदात्मजा । ब्रह्मानन्दं नमस्कृत्य तच्चितायां समारुहत् ॥२०७
तेन सार्द्धं च सा शुद्धा श्वशुरस्याज्ञया मुदा । सप्तजन्मकथां कृत्वा स्वपतेस्तु ददाह वै ॥२०८
तच्चितायां च भर्तारमिन्दुलं बलवत्तरम् । संस्थाप्य दाहयामास तेन सार्द्धं कलेवरम् ॥२०९
रात्रौ परिमलो राजा लक्षणेन समन्वितः । महीराजमुपागम्य महद्युद्धमकारयत् ॥२१०
सपादलक्षाश्च तदा हतशेषा महाबलाः । त्रिलक्षैर्हतशेषैश्च सार्द्धं योद्धुमुपस्थिताः ॥२११
धान्यपालः शतं भूपाँल्लक्षणश्च तथा शतम् । तालनश्च शतं भूपान्हत्वा राजानमाययौ ॥२१२
महीराजस्तदा दुःखी ध्यात्वा रुद्रं महेश्वरम् । निशीथे समनुप्राप्ते हतशेषैस्समागतः ॥

---

सेना में हाहाकार मच गया । उस कोलाहल को सुनकर ब्रह्मानन्द की मूर्च्छा नष्ट हो गई । उन्होंने वेला से कहा—प्रिये ! हरिनागर नामक घोड़े पर बैठकर तुम शीघ्र रण में पहुँचो । मेरा ही वेष धारणकर तुम तारक (ताहर) का शीघ्र हनन करो विलम्ब मत करो । इसे सुनकर आह्लाद के साथ वेला सहस्र

एकाकी गजमारुह्य ययौ चादिभयङ्करम् ॥२१३
रुद्रदत्तेन बाणेन हत्वा परिमलं नृपम् । धान्यपालं तथा हत्वा तालनं बलवत्तरम् ॥
लक्षणान्तमुपागम्य महद्युद्धमचीकरत् ॥२१४
महीराजस्य रौद्रास्त्रैस्सैन्यास्सर्वे क्षयं गताः । लक्षणं प्रति रौद्रास्त्रं महीराजः समादधे ॥२१५
तदा तु लक्षणो वीरो वैष्णवास्त्रं समादधे । तेनास्त्रेण क्षयं जातो महीराजस्य सायकः ॥
तेनास्त्रतेजसा राजा महासन्तापमाप्तवान् ॥२१६
ध्यात्वा रुद्रं महादेवं त्यक्त्वा विद्यां च वैष्णवीम् । स्वभल्लेन शिरः कायादपाहरत भूमिपः ॥२१७
हस्तिनी च तदा रुष्टा गजमादिभयङ्करम् । गत्वा युद्धं मुहूर्त्तेन कृत्वा स्वर्गमुपाययौ ॥२१८
उषःकाले च सम्प्राप्ते मलना पतिमुत्तमम् । तच्चितायां समारोप्य ददाह स्वं कलेवरम् ॥२१९
तदा तु देवकी शुद्धं लक्षणं बलवत्तरम् । तालनादींस्तथा हुत्वा ददाह स्वं कलेवरम् ॥२२०
प्रभाते विमले जाते चतुर्थे भौमवासरे । तथा हुत्वा स्वर्णवतीं कृत्वा तेषां तिलाञ्जलिम् ॥
ध्यात्वा सर्वमयीं देवीं स्थिरीभूय स्वयं स्थितः ॥२२१
एतस्मिन्नन्तरे तत्र कलिर्भार्यासमन्वितः । वाञ्छितं फलमागम्य तुष्टाव श्लक्ष्णया गिरा ॥२२२

## कलिरुवाच

नम आह्लाद महते सर्वानन्दप्रदायिने । योगेश्वराय शुद्धाय महावतीनिवासिने ॥२२३
रामांशस्त्वं महाबाहो मम पालनतत्परः । कलैकया समागम्य भुवो भारस्त्वयाहृतः ॥२२४

---

उस आधीरात के समय महेश्वर भगवान् शंकर के ध्यानपूर्वक शेष सैनिकों के साथ अकेले हाँथी पर बैठकर युद्ध करने लगे। उन्होंने रुद्रप्रदत्त बाण द्वारा परिमल धान्यपाल एवं तालन के निधन करने के उपरांत लक्षण (लाखन) के समीप प्रस्थान किया। वहाँ पहुँचकर उन्होंने घोर युद्ध किया, जिससे उनके रौद्रास्त्र

राजानः पावकीयाश्च तपोबलसमन्विताः । हत्वा तान्पञ्चसाहस्रान्क्षुद्रभूपाननेकशः ॥
योगमध्ये समासीनो नमस्तस्मै महात्मने ॥२२५
तेषां सैन्याः षष्टिलक्षाः क्रमाद्वीर त्वया हताः । वरं ब्रूहि महाभाग यत्ते मनसि वर्तते ॥२२६
इति श्रुत्वा स आह्लादो वचनं प्राह निर्भयः । मम कीर्तिस्त्वया देव कर्तव्या च जने जने ॥२२७
पुनस्ते कार्यमतुलं करिष्यामि शृणुष्व भोः । महीराजश्च धर्मात्मा शिवभक्तिपरायणः ॥
तस्य नेत्रे मया शुद्धे कर्तव्ये नीलरूपके ॥२२८
तव प्रियः सदा नीलस्तथैव च मम प्रियः । देवानां दुःखदो देव दैत्यानां हर्षवर्द्धनः ॥२२९
इत्युक्त्वा स तु रामांशो गजमारुह्य वेगतः । महीराजमुपागम्य महद्युद्धं चकार ह ॥२३०
रुद्रदत्ता गजस्तूर्णं पञ्चशब्दमुपस्थितः । पद्मदन्तान्समारुह्य युयुधाते परस्परम् ॥२३१
अन्योऽन्येन तथा हत्वा गजौ स्वर्गमुपेयतुः ॥२३२
तदा भयातुरो राजा त्यक्त्वा युद्धं भयङ्करम् । स तु दुद्राव वेगेन रामांशोऽनुययौ ततः ॥२३३
केशेषु च महीराजं गृहीत्वा तरसा बली । कलिदत्तं महानीलं नेत्रयोस्तेन तत्कृतम् ॥२३४
तदाप्रभृति वै शम्भुरशुद्धं नृपतिं प्रियम् । मत्वा त्यक्त्वा ययौ स्थाने कैलासे गुह्यकालये ॥२३५
आह्लादः कलिना सार्द्धं कदलीवनमुत्तमम् । गत्वा योगं चकाराशु पर्वते गन्धमादने ॥२३६

---

अंश से अवतरित और मेरे पालन करने में कटिबद्ध हैं । तपोबल प्रधान उन पाँच सहस्र अग्निवंशीय तथा अनेक क्षुद्र राजाओं के हनन द्वारा आपने इस भूतल के भार का अपहरण किया है और अनन्तर आसानासीन होकर योगध्यान में तन्मय हो रहें हैं, अतः आप ऐसे महानुभाव को सादर नमस्कार कर रहा हूँ । महाभाग ! आपने अपनी अद्भुत वीरता प्रकट कर उनकी साठ लाख सेना का भी विध्वंस किया है, इसलिए मनइच्छित वर की याचना कीजिये । इसे सुनकर आह्लाद ने निर्भय होकर कहा—देव ! आप

तथा भूतं च रामांशं कलिर्दृष्ट्वा मुदान्वितः । बलिपार्श्वमुपागम्य वर्णयामास सर्वशः ॥२३७
स वै बलिर्दैत्यराजोऽयुतैः सह विनिर्गतः । गौरदेशमुपागम्य सहोड्डीनमुवाच ह ॥२३८
गच्छ वीर बलैस्सार्द्धं निशायां रक्षितो मया । हत्वा भूपं महीराजं विद्युन्मालां गृहाण भोः ॥२३९
इति श्रुत्वा वचस्तस्य षोडशाब्दान्तरे गते । सपादलक्षैश्च बलैः कुरुक्षेत्रमुपाययौ ॥२४०
महीराजसुताञ्जित्वा समाहूय महावतीम् । महीपतिं प्रेषयित्वा लुण्ठयित्वा च तद्वसु ॥२४१
लिङ्गार्थं कृतवान्यत्नं स नृपः कीर्तिसागरे । न प्राप्तस्सनृपस्तं वै स्वगेहाय तदा ययौ ॥२४२
लक्षचण्डीं कारयित्वा परमानन्दमाप्तवान् । जयचन्द्रस्तु तच्छ्रुत्वा पुत्रशोकसमन्वितः ॥२४३
निराहारो यतिर्भूत्वा मृतः स्वर्गपुरं ययौ । सहोड्डीनेन स नृपः कृत्वा युद्धं भयङ्करम् ॥२४४
सप्ताहोरात्रमात्रेण म्लेच्छराजवशं गतः । मारितो बहुयत्नेन महीराजो न वै मृतः ॥२४५
तदा म्लेच्छस्सहोड्डीनो निर्बन्धनमथाकरोत् । ज्योतिरूपस्थितं तत्र चन्द्रभट्टो नृपाज्ञया ॥
क्षुरप्रेण च बाणेन हत्वा वह्नौ ददाह वै ॥२४६
विद्युन्मालां स च म्लेच्छो गृहीत्वा च धनं बहु । तत्रास्थाप्य स्वदासं च कुतुकोड्डीनमागतः ॥२४७

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयो नाम द्वात्रिंशोऽध्यायः ।३२

॥ इति तृतीयखण्डं समाप्तम् ॥

---

जाकर उनसे समस्त वृतान्त का वर्णन किया । उस समय दैत्यराज बलि ने अपने दश सहस्र सैनिकों समेत और देश में जाकर सहोड्डीन (सहाबुद्दीन) से कहा—वीर ! मैं तुम्हारी रक्षा करता रहूँगा, इसी रात में अपनी सेना समेत चलो और पृथ्वीराज को पराजित कर विद्वन्माला का ग्रहण करो । इसे सुनकर उसने अपने सवा लाख सैनिकों समेत कुरुक्षेत्र को प्रस्थान किया । सोलह दिन की यात्रा करके वहाँ पहुँचने पर

# चतुर्थखण्डम्

## अथ प्रथमोऽध्यायः

### प्रमरवंशवर्णनम्

### वेदव्यास उवाच

एवं द्वापरसन्ध्याया अन्ते सूतेन वर्णितम्। सूर्यचन्द्रान्वयाख्यानं तन्मया कथितं तव ॥१
विशालायां पुनर्गत्वा वैतालेन विनिर्मितम् । कथयिष्यति सूतस्तमितिहाससमुच्चयम् ॥२
तन्मया कथितं सर्वं हृषीकोत्तमपुण्यदम् । पुनर्विक्रमभूपेन भविष्यति समाह्वयः ॥३
नैमिषारण्यमासाद्य श्रावयिष्यति वै कथाम् । पुनरुक्तानि यान्येव पुराणाष्टादशानि वै ॥४
तानि चोपपुराणानि भविष्यन्ति कलौ युगे । तेषां चोपपुराणानां द्वादशाध्यायमुत्तमम् ॥५
सारभूतश्च कथित इतिहाससमुच्चयः । यस्ते मया च कथितो हृषीकोत्तम ते मुदा ॥६
विक्रमाख्यानकालान्तेऽवतारः कलया हरेः । स च शक्त्यावतारो हि राधाकृष्णस्य भूतले ॥७
तत्कथां भगवान्सूतो नैमिषारण्यमास्थितः । अष्टाशीतिसहस्राणि श्रावयिष्यति वै मुनीन् ॥८
यत्तन्मया च कथितं हृषीकोत्तम ते मुदा । पुनस्ते शौनकाद्याश्च कृत्वा स्नानादिकाः क्रियाः ॥९
सूतपार्श्वं गमिष्यन्ति नैमिषारण्यवासिनः । तत्पृष्टेनैव सूतेन यदुक्तं तच्छृणुष्व भोः ॥१०

---

# चतुर्थ खण्ड

## ऋषय ऊचुः

श्रुतं कृष्णस्य चरितं भगवन्भवतोदितम् । इदानीं श्रोतुमिच्छामि राज्ञां तेषां क्रमात्कुलम् ।।११
चतुर्णां वह्निजातानां परं कौतूहलं हि नः । स हरिस्त्रियुगी प्रोक्तः कथं जातः कलौ युगे ।।१२

## सूत उवाच

कथयामि मुनिश्रेष्ठा युष्माकं प्रश्नमुत्तमम् । अग्निवंशनृपाणां च चरित्रं शृणु विस्तरात् ।।१३
प्रमरश्च महीपालो दक्षिणां दिशमास्थितः । अम्बया रचितां दिव्यां प्रमराय पुरीं शुभाम् ।।१४
निवासं कृतवान्राजा सामवेदपरो बली । षड्वर्षाणि कृतं राज्यं तस्माज्जातो महामरः ।।१५
त्रिवर्षं च कृतं राज्यं देवापिस्तनयोऽभवत् । पितुस्तुल्यं कृतं राज्यं देवदूतस्ततोऽभवत् ।।
पितुस्तुल्यं कृतं राज्यं शृणु तत्कारणं मुने ।।१६
अशोके निहते तस्मिन्बौद्धभूपे महाबले । कलिर्भास्करमाराध्य तपसा ध्यानतत्परः ।।१७
पञ्चवर्षान्तरे सूर्यस्तस्मै च कलये मुदा ।। शकाख्यं नाम पुरुषं ददौ तद्भक्तितोषितः ।।१८
तदा प्रसन्नः स कलिः शकाय च महात्मने । तैत्तिरं नगरं प्रेम्णा ददौ हर्षितमानसः ।।१९
तत्र गोपान्दस्युगणान्वशीकृत्य महाबली । आर्यदेशविनाशाय कृत्वोद्योगं पुनः पुनः ।।
हतवान्भूपतीन्बाणैस्तस्मात्ते स्वल्पजीविनः ।।२०

---

**ऋषियों ने कहा**—आपके मुख से उदीयमान उस भगवान् कृष्ण के चरित्रों को हम लोगों ने भली-भाँति सुन लिया है । अब इस समय उन अग्निवंशीय चारों राजाओं के वंश-वृत्तान्त, हम लोग सुनना चाहतें हैं तथा भगवान त्रियुगी बताये जाते है अर्थात् (तीनों ही युगों में अवतरित होते हैं) पुनः कलियुग में उनका अवतरित होना कैसे बताया गया है ? ११-१२

गन्धर्वसेनश्च नृपो देवदूतात्मजो बली । शताद्धाब्दं पदं कृत्वा तपसे पुनरागतः ।।२१
शिवाज्ञया च नृपतिर्विक्रमस्तनयस्ततः । शतवर्षं कृतं राज्यं देवभक्तस्ततोऽभवत् ।।
दशवर्षं कृतं राज्यं शकैर्दुष्टैर्लयं गतः ।।२२
शालिवाहन एवापि देवभक्तस्य चात्मजः । जित्वा शकान्स षष्टयब्दं राज्यं कृत्वा दिवं गतः ।।२३
शालिहोत्रस्तस्य सुतो राज्यं कृत्वा शतार्द्धकम् । स्वर्गलोकं ततः प्राप्तस्तत्सुतः शालिवर्द्धनः ।।२४
पितुस्तुल्यं कृतं राज्यं शकहन्ता ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं सुहोत्रस्तनयोऽभवत् ।।२५
पितुस्तुल्यं कृतं राज्यं हविर्होत्रस्ततोऽभवत् पितुस्तुल्यं कृतं राज्यमिन्द्रपालस्ततोऽभवत् ।।२६
पुरीमिन्द्रावतीं कृत्वा तत्र राज्यमकारयत् । पितुस्तुल्यं कृतं राज्यं माल्यवान्नाम तत्सुतः।।
पुरीं माल्यवतीं कृत्वा पितुस्तुल्यं कृतं पदम् ।।२७
अनावृष्टिस्ततश्चासीन्महती चतुरब्दिका । ततः क्षुधातुरो राजाश्वविष्ठाधान्यगर्हितम् ।।२८
संस्कृत्य मन्दिरे राजा शालग्रामाय चार्पयत् । तदा प्रसन्नो भगवान्वचनं नभसेरितम् ।।२९
कृत्वा ददौ वरं तस्मै शृणु तन्मुनिसत्तम । कुले यावन्नृपा भाव्यास्तव भूपतिसत्तम ।।
अनावृष्टिर्न भविता तावत्ते राष्ट्र उत्तमे ।।३०
सुतो माल्यवतश्चासीच्छम्भुदत्तो हरप्रियः । पितुस्तुल्यं कृतं राज्यं भौमराजस्ततोऽभवत् ।।३१
पितुस्तुल्यं कृतं राज्यं वत्सराजस्ततोऽभवत् । पितुस्तुल्य कृतं राज्यं भोजराजस्ततोऽभवत् ।।३२
पितुस्तुल्यं कृतं राज्यं शम्भुदत्तस्ततोऽभवत् । दशहीनं कृतं राज्यं भोजराजपितुस्समम् ।।३३
शम्भुदत्तस्य तनयो बिन्दुपालस्ततोऽभवत् । बिन्दुखण्डं च राष्ट्रं वै कृत्वा स सुखितोऽभवत् ।।
तेन राज्यं पितुस्तुल्यं कृतं वेदविदा मुने ।।३४

---

होने पर विक्रम नामक पुत्र उनके उत्पन्न हुआ । उनके सौ वर्ष राज्योपभोग करने पर देवभक्त नामक पुत्र

बिन्दुपालस्य तनयो राजापालस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं तस्माज्जातो महीनरः ।।३५
पितुस्तुल्यं कृतं राज्यं सोमवर्मा नृपोऽभवत् । पितुस्तुल्यं कृतं राज्यं कामवर्मा सुतोऽभवत् ।।३६
पितुस्तुल्यं कृतं राज्यं भूमिपालस्ततोऽभवत् । भूसरस्तेन खनितं पुरं तत्र शुभं कृतम् ।।३७
पितुस्तुल्यं कृतं राज्यं रङ्गपालस्ततोऽभवत् । भूमिपालस्तु नृपतिर्जित्वा भूपाननेकशः ।।३८
वीरसिंहस्ततो नाम्ना विख्यातोऽभून्महीतले । स्वराज्ये रङ्गपालं स चाभिषिच्य वनं ययौ ।।
तपः कृत्वा दिवं यातो देवदेवप्रसादतः ।।३९
कल्पसिंहस्ततो जातो रङ्गपालान्नृपोत्तमात् । अनपत्यो हि नृपतिः पितुस्तुल्यं कृतं पदम् ।।४०
एकदा जाह्नवीतोये स्नानार्थं मुदितो ययौ । दानं दत्त्वा द्विजातिभ्यः कल्पक्षेत्रमवाप्तवान् ।।४१
पुण्यभूमिं समालोक्य शून्यभूतां स्थलीमपि । नगरं कारयामास तत्र स्थाने मुदान्वितः ।।४२
कलापनगरं नाम्ना प्रसिद्धमभवद्भुवि । तत्र राज्यं कृतं तेन गङ्गासिंहस्ततोऽभवत् ।।४३
नवत्यब्दवपुर्भूत्वा सोऽनपत्यो रणं गतः । त्यक्त्वा प्राणान्कुरुक्षेत्रे स्वर्गलोकमवाप्तवान् ।।
समाप्तिमगमद्विप्र प्रमरस्य कुलं शुभम् ।।४४
तदन्वये च ये शेषाः क्षत्रियास्तदनन्तरम् । तन्नारीष्वमितो विप्र बभूव वर्णसङ्करः ।।४५

---

के शम्भुदत्त नामक पुत्र हुआ, जिसने अपने पिता से दश वर्ष कम समय तक राज्य किया । शम्भुदत्त के पुत्र विन्दुपाल हुए, जिसने विंदुखण्ड नामक राष्ट्र का निर्माण कर अपने पिता के समानकाल तक सुखी जीवन व्यतीत किया । मुने ! विन्दुपाल के राजपाल, राजपाल के महीनर, महीनर के सोमवर्मा, सोमवर्मा के

**वैश्यवृत्तिकराः सर्वे म्लेच्छतुल्या महीतले । इति ते कथितं विप्र कुलं दक्षिणभूपतेः ।।४६**

**इति श्रीभविष्य महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये प्रमरवंशवर्णनं नाम प्रथमोऽध्यायः ।१**

# अथ द्वितीयोऽध्यायः

## प्रमरवंशवर्णनम्

### सूत उवाच

**वयहानिर्महीपालो मध्यदेशे स्वकं पदम् । गृहीत्वा ब्रह्मरचितमजमेरमवासयत् ।।१**
**अजस्य ब्रह्मणो मा च लक्ष्मीस्तत्र रमा गता । तया च नगरं रम्यमजमेरमजं स्मृतम् ।।२**
**दशवर्षं कृतं राज्यं तोमरस्तत्सुतोऽभवत् ।पार्थिवैः पूजयामास वर्षमात्रं महेश्वरम् ।।३**
**इन्द्रप्रस्थं ददौ तस्मै प्रसन्नो नगरं शिवः । तदन्वये च ये जातास्तोमराः क्षत्रियाः स्मृताः ।।४**
**तोमरावरजश्चैव चयहानिसुतः शुभः । नाम्ना सामलदेवश्च प्रश्रितोऽभून्महीतले ।।५**
**सप्तवर्षं कृतं राज्यं महादेवस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यमजयश्च ततोभवत् ।।६**
**पितुस्तुल्यं कृतं राज्यं वीरसिंहस्ततोऽभवत् । शताद्धाब्दं कृतं राज्यं ततोबिन्दुसुरोऽभवत् ।।७**

---

अनुसरण करते हुए म्लेच्छों के साथ रहकर अपने जीवन व्यतीत किये। विप्र ! इस प्रकार दक्षिणी राजाओं की वंश परम्परा बता दी गई ।४५-४६

श्री भविष्यमहापुराण के प्रतिसर्गपर्व में कलियुगीय इतिहाससमुच्चय में प्रमरवंश वर्णन नामक पहला अध्याय समाप्त ।१।

पितुरर्द्धं कृतं राज्यं मध्यदेशे महात्मना । तस्माच्च मिथुनं जातं वीरा वीरविहात्तकः ।।८
विक्रमाय ददौ वीरां पिता वेदविधानतः । स्वपुत्राय स्वकं राज्यं मध्यदेशान्तरं मुदा ।।९
पितुस्तुल्यं कृतं राज्यं माणिक्यस्तत्सुतोऽभवत् । शताद्धाब्दं कृतं राज्यं महासिंहस्ततोऽभवत् ।।१०
पितुस्तुल्यं कृतं राज्यं चन्द्रगुप्तस्ततोऽभवत् । पितुरर्द्धं कृतं राज्यं तत्सुतश्च प्रतापवान् ।।११
पितुस्तुल्यं कृतं राज्यं मोहनस्तत्सुतोऽभवत् । त्रिंशदब्दं कृतं राज्यं श्वेतरायस्ततोऽभवत् ।।१२
पितुस्तुल्यं कृतं राज्यं नागवाहस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं लोहधारऽस्ततोभवत् ।।१३
पितुस्तुल्यं कृतं राज्यं वीरसिंहस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं विबुधस्तत्सुतोऽभवत् ।।१४
शताद्धाब्दं कृतं राज्यं चन्द्ररायस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं ततो हरिहरोऽभवत् ।।१५
पितुस्तुल्यं कृतं राज्यं वसन्तस्तस्य चात्मजः । पितुस्तुल्यं कृतं राज्यं बलाङ्गस्तनयोऽभवत् ।।१६
पितुस्तुल्यं कृतं राज्यं प्रमथस्तत्सुतोऽभवत् । पितुस्तुल्यं कृतं राज्यमङ्गरायस्ततोऽभवत् ।।१७
पितुस्तुल्यं कृतं राज्यं विशालस्तस्य चात्मजः । पितुस्तुल्यं कृतं राज्यं शार्ङ्गदेवस्ततोऽभवत् ।।१८
पितुस्तुल्यं कृतं राज्यं मन्त्रदेवस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं जयसिंहस्ततोऽभवत् ।।१९
आर्यदेशाश्च सकला जितास्तेन महात्मना । तद्धनैः कारयामास यज्ञं बहुफलप्रदम् ।।२०
ततश्चानन्द देवो हि जातःपुत्रः शुभाननः । शताद्धाब्दं कृतं राज्यं जयसिंहेन धीमता ।।२१
तत्सुतेन पितुस्तुल्यं कृतं राज्यं महीतले । सोमेश्वरस्तस्य सुतो महाशूरो बभूव ह ।।२२
अनङ्गपालस्य सुतो ज्येष्ठां वै कीर्तिमालिनीम् । तामुद्वाह्य विधानेन तस्यां पुत्रानजीजनत् ।।२३

---

और शेष राजगण अपने पिता के समान काल तक । उस महात्मा राजा विंदुसुर ने, जो वीर- सिंह का पुत्र था, मध्य प्रदेश में अपने पिता के राजकाल के आधे समय तक सिंहासनासीन रहकर 'वीरा और वीर' नामक

धुन्धुकारश्च वै ज्येष्ठो मथुराराष्ट्रसंस्थितः । मध्यः कुमाराख्यसुतः पितुः पदसमास्थितः ।।२४
महीराजस्तु बलवांस्तृतीयो देहलीपतिः । सहोद्दीनस्य नृपतेर्वशमाप्य मृतिं गतः ।।२५
चपहानेश्च स कुलं छाययित्वा दिवं ययौ । तस्य वंशे तु राजन्यास्तेषां पत्न्यः पिशाचकैः ।।२६
म्लेच्छैश्च भुक्तवत्यस्ता बभूवुर्वर्णसङ्कराः । न वै आर्या न वै म्लेच्छा जट्टा जात्या च मेहनाः ।।२७
मेहना म्लेच्छजातीया जट्टा आर्यमयाः स्मृताः । क्वाचित्क्वाचिच्च ये शेषाः क्षत्रियाश्चपहानिजाः ।।२८

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चये प्रमरवंशवर्णनं नाम द्वितीयोऽध्यायः ।२

# अथ तृतीयोऽध्यायः

## प्रमरवंशवर्णनम्

### सूत उवाच

शुक्लवंशं प्रवक्ष्यामि शृणु विप्रवरादितः । यदा कृष्णः स्वयं ब्रह्म त्यक्त्वा भूमिं स्वकं पदम् ।।१
दिव्यं वृन्दावनं रम्यं प्रययौ भूतले तदा । कलेरागमनं ज्ञात्वा म्लेच्छपा द्वीपमध्यगे ।।२
स्थिता द्वीपेषु वै नाना मनुजा वेदतत्पराः । कलिनामित्रधर्मेण दूषितास्ते बभूविरे ।।३
अष्टषष्टिसहस्राणां वर्षाणां मुनिसत्तम । अद्य प्रभृति वै जातः कालः कलिसमागमे ।।४

---

जो मथुराराज्य का अधीश्वर था । मध्यम पुत्र का नाम कुमार था, अपने पिता के पदपर ही प्रतिष्ठित था और कनिष्ट पुत्र का नाम पृथ्वीराज था, जिसने दिल्ली सिंहासन पर प्रतिष्ठित होकर राजा सहोद्दीन (सहाबुद्दीन) के अधीन होने पर अपना प्राणविसर्जन किया । उसी ने चयहानि वंश का समूलनाश कराया था । उनके वंश में शेष राजाओं की पत्नियों के उपभोग उन म्लेच्छों ने किया, जिससे वर्णसंकरों

षष्टिवर्षसहस्राणि द्वीपराज्यमचीकरत् । स कलिर्म्लेच्छया सार्धं सूर्यपूजनतत्परः ॥५
तत्पश्चाद्भारते वर्षे म्लेच्छया कलिराययौ । दृष्ट्वा तद्भारतं वर्षं लोकपालैश्च पालितम् ॥६
भयभीतस्त्वराविष्टो गन्धर्वाणां यशस्करः । स कलिः सूर्यमाराध्य समाधिस्थो बभूव ह ॥७
ततो वर्षशताब्दान्ते सन्तुष्टो रविरागतः । सोंऽशुभिर्लोकमातप्य महावृष्टिमकारयत् ॥८
चतुर्वर्षसहस्राणि चतुर्वर्षशतानि च । व्यतीतानि मुनिश्रेष्ठ चाद्य प्रभृति संलपे ॥९
सम्पन्नं भारतं वर्षं तदा जातं समन्ततः । न्यूहाख्यो यवनो नाम तेन वै पूरितं जगत् ॥१०
सहस्राब्दकलौ प्राप्ते महेन्द्रो देवराट् स्वयम् । काश्यपं प्रेषयामास ब्रह्मावर्ते महोत्तमे ॥११
आर्यावती देवशक्तिस्तत्करं चाग्रहीन्मुदा । दशपुत्रान्समुत्पाद्य स द्विजो मिश्रमागमत् ॥१२
मिश्रदेशोद्भवान्म्लेच्छान्वशीकृत्यायुतं मुदा । स्वदेशं पुनरागत्य शिष्यांस्तान्स चकार ह ॥१३
नष्टायां सप्तपुर्यां च ब्रह्मावर्तं महोत्तमम् । सरस्वतीदृषद्वत्योर्मध्यगं तत्र चावसत् ॥१४
स्वपुत्रं शुक्लमाहूय द्विजश्रेष्ठं तपोधनम् । आज्ञाप्य रैवतं शृङ्गं तपसे तु पुनः स्वयम् ॥१५
नवपुत्रांस्तथा शिष्यान्मनुधर्मं सनातनम् । श्रावयामास धर्मात्मा स राजा मनुधर्मगः ॥१६
शुक्लोऽपि रैवतं प्राप्य सच्चिदानन्दविग्रहम् । वासुदेवं जगन्नाथं तपसा समतोषयत् ॥१७
तदा प्रसन्नोभगवान्द्वारकानायको बली । करे गृहीत्वा तं विप्रं समुद्रान्तमुपाययौ ॥१८
द्वारकां दर्शयामास दिव्यशोभासमन्विताम् । व्यतीते द्विसहस्राब्दे किञ्चिज्जाते भृगूत्तम ।१९
अग्निद्वारेण प्रययौ स शुक्लोऽर्वुदपर्वते । जित्वा बौद्धान्द्विजैः सार्धं त्रिभिरन्यैश्च बन्धुभिः ॥२०

---

साठ सहस्र वर्ष तक उसने द्वीपों में राज्य किया । पश्चात् म्लेच्छ के साथ सूर्य की आराधना की । तदुपरांत भारत वर्ष में म्लेच्छ समेत उसका आगमन हुआ । लोकपालों द्वारा सुरक्षित इस भारत वर्ष को देखकर वह अत्यन्त भयभीत हुआ, किन्तु गंधर्वों के यशस्वी उस कलि ने सूर्य की आराधना पूर्वक शीघ्र ही समाधि लगाना

द्वारकां कारयामास हरेश्च कृपया हि सः । तत्रोष्य मुदितो राजा कृष्णध्यानपरोऽभवत् ॥२१
पश्चिमे भारते वर्षे दशाब्दं कृतवान्पदम् । नारायणस्य कृपया विष्वक्सेनः सुतोऽभवत् ॥२२
विंशदब्दं कृतं राज्यं जयसेनस्ततोऽभवत् । त्रिंशदब्दं कृतं राज्यं विसेनस्तस्य चात्मजः ॥२३
शतार्धाब्दकृतं राज्यं मिथुनं तस्य चाभवत् । प्रमोदो मोदसिंहश्च विक्रमाय निजां सुताम् ॥२४
विसेनश्च ददौ प्रीत्या राष्ट्रं पुत्राय चोत्तमम् । पितुस्तुल्यं कृतं राज्यं सिन्धुवर्मा सुतोऽभवत् ॥२५
सिन्धुकूले कृतं राज्यं त्यक्त्वा तत्पैतृकं पदम् । सिन्धुदेशस्ततो नाम्ना प्रसिद्धोभून्महीतले ॥२६
पितुस्तुल्यं कृतं राज्यं राज्ञा वै सिन्धुवर्मणा । सिन्धुद्वीपस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥२७
श्रीपतिस्तस्य तनयो गौतमान्वयसम्भवाम् । काच्छपीं महिषीं प्राप्य कच्छदेशमुपाययौ ॥२८
पुलिन्दान्यवनाञ्जित्वा तत्र देशमकारयत् । देशो वै श्रीपतिर्नाम्ना सिन्धुकूले बभूव ह ॥२९
पितुस्तुल्यं कृतं राज्यं भुजवर्मा ततोऽभवत् । जित्वा स शबरान्भिल्लांस्तत्र राष्ट्रमकारयत् ॥३०
भुजदेशस्ततो जातः प्रसिद्धोऽभून्महीतले । पितुस्तुल्यं कृतं राज्यं रणवर्मा सुतोऽभवत् ॥३१
पितुस्तुल्यं कृतं राज्यं चित्रवर्मा सुतोऽभवत् । कृत्वा स चित्रनगरीं वनमध्ये नृपोत्तमः ॥३२
पितुस्तुल्यं कृतं राज्यं धर्मवर्मा सुतोऽभवत् । पितुस्तुल्यं कृतं राज्यं कृष्णवर्मा सुतोऽभवत् ॥३३
पितुस्तुल्यं कृतं राज्यमुदयस्तत्सुतोऽभवत् । कृत्वोदयपुरं रम्यं वनमध्ये नृपोत्तमः ॥३४
पितुस्तुल्यं कृतं राज्यं वाप्यकर्मा सुतोऽभवत् । वापीकूपतडागानि नानाहर्म्याणि तेन वै ॥३५

---

भाइयों और ब्राह्मणों के साथ बौद्धों को जीतकर भगवान् की कृपावश द्वारका नगर स्थापित किया। पश्चात् वहाँ रहते हुए उन्होंने भगवान् कृष्ण का ध्यान करना प्रारम्भ किया। १३-२१। पश्चिमीय भारत में अधीश्वर के पदपर दश वर्ष तक प्रतिष्ठित रहने के उपरांत भगवान् की कृपा से उनके विष्वक्सेन नामक पुत्र उत्पन्न हुआ। बीस वर्ष राज्य करने पर उसके जयसेन हुए जिसके तीस वर्ष तक राज्य करने के

धर्मार्थे कारयामास धर्मात्मा स च वै पुरम् । एतस्मिन्नन्तरे प्राप्तो बलदो नाम भूपतिः ।।३६
लक्षसैन्ययुतो वीरो महामदमते स्थितः । तेन सार्धमभूद्युद्धं राज्ञो वै वाप्यकर्मणः ।।३७
जित्वा पैशाचकान्म्लेच्छान्कृष्णोत्सवमकारयत् । पितुस्तुल्यं कृतं राज्यं गुहिलस्तत्सुतोऽभवत् ।।३८
पितुस्तुल्यं कृतं राज्यं कालभोजः सुतोऽभवत् । पितुस्तुल्यं कृतं राज्यं राष्ट्रपालस्ततोऽभवत् ।।३९
स त्यक्त्वा पैतृकं स्थानं वैष्णवीं शक्तिमागमत् । तपसाराधयामास शारदां सर्वमङ्गलाम् ।।४०
प्रसन्ना सा तदा देवी कारयामास वै पुरीम् । महावतीं महारम्यां मणिदेवेन रक्षिताम् ।।४१
तत्रोष्य नृपतिर्धीमान्दशाब्दं राज्यमाप्तवान्। तस्योभौ तनयौ जातौ विजयः प्रजयस्तथा ।।४२।
प्रजयः पितरौ त्यक्त्वा गङ्गाकूलमुपाययौ । द्वादशाब्दं च तपसा पूजयामास शारदाम् ।।४३
कन्यामूर्तिमयी देवी वेणुवादनतत्परा । हयमारुह्य संप्राप्ता विहस्याह महीपतिम् ।।४४
किन्निमित्तं भूपसुतं त्वया चाराधिता शिवा । तत्फलं त्वं हि तपसा मत्तः शीघ्रमवाप्स्यसि ।।४५
इति श्रुत्वा स होवाच कुमारि मधुरस्वरे । नवीनं नगरं मह्यं कुरु देवि नमोस्तु ते ।।४६
इति श्रुत्वा सु सा देवी ददौ तस्मै हयं शुभम् । पुरो भूत्वा वाद्यकारी दक्षिणां दिशमागता ।।४७
स भूपो हयमारुह्य नेत्र आच्छाद्य चाययौ । पुनः स भूपतिः पश्चात्पश्चिमां दिशमागता ।।४८
ततोऽनुप्रययौ पूर्वमर्कणो यत्र पक्षिराट् । भयभीतो नृपस्तेन समुन्मील्य स चक्षुषी ।।४९

---

धर्मार्थ एक नगर का निर्माण कराया ।२२-३५। उसी बीच वलद नामक राजा ने मदान्ध होकर अपने एक लाख सैनिकों समेत वहाँ से आकर इस राजा से युद्ध आरम्भ किया । राजा वाप्यवर्मा ने उस म्लेच्छ राजा को पराजित कर भगवान् कृष्ण का महान् उत्सव कराया । पश्चात् उनके गुहिल नामक पुत्र हुआ ।

ददर्श नगरं रम्यं कन्याया रचितं शुभम् । उत्तरे तस्य वै गङ्गा दक्षिणेनास पाण्डुरा ॥५०
पश्चिमे ईशसरिता पूर्वे पक्षी स मर्कणः । कुब्जभूतमभूद्ग्रामं कान्यकुब्ज इति स्मृतः ॥५१
दशवर्षं च तेनैव जयपालेन वै पदम् । कृतं तस्य सुतो जातो वेणुवाद्याच्च वेणुकः ॥५२
स वेणुश्च महीपालो देवींदत्तां मनोहराम् । पत्नीं कन्यावतीं नाम्ना समुद्वाह्य रराज ह ॥५३
तस्यां सप्त सुता जाता मातॄणां मङ्गलाः कलाः । शीतला पार्वती कन्या तथा पुष्पवती स्मृता ॥५४
गोवर्धनी च सिन्दूरा काली नाम्ना प्रकीर्तिता । ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥५५
वाराही च तथेन्द्राणी चामुण्डाः क्रमतोऽभवन् । एकदा भूपतेः पत्नी तंतुना मृत्तिकाघटन् ॥५६
कूपे कृतवती प्रेम्णा यथा पूर्वं तथाद्य सा । ददर्श बहुला नारीर्नानाभूषणभूषिताः ॥५७
स्वयमेकैव वसना मनोग्लानिमुपाययौ । तदैव स घटो भूमौ न प्राप्तः सप्रवृत्तिकाम् ॥५८
दृष्ट्वा कन्यावती देवी घटहीना गृहं ययौ । तदा तु सप्त कन्याश्च शिलाभूता गृहे स्थिताः ॥५९
श्रुत्वा वेणुस्तदागत्य भर्त्सयित्वा स्वकां प्रियाम् । ब्रह्मचर्यव्रतं त्यक्त्वा रमयामास योषितम् ॥६०
नृपाद्वै वीरवत्यां च यशोविग्रह आत्मजः । बभूव बलवान्धर्मी चार्यदेशपतिः स्वयम् ॥६१
विंशद्वर्षं कृतं राज्यं तेन राज्ञा महीतले । महीचन्द्रस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥६२
चन्द्रदेवस्तस्य सुतो राज्यं तेन पितुः समम् । कृतं तस्मात्सुतो जातो मन्दपालो महीपतिः ॥६३

---

राजा ने अपने नेत्रों को खोला, तो उस स्थान पर उस कन्या द्वारा रचित एक रमणीक नगर सामने दिखाई दिया, जिसके उत्तर की ओर गंगा, दक्षिण की ओर पाण्डुरा, पश्चिम की ओर ईश और पूर्व की ओर वही मर्कण नामक पक्षी रहता था। वह नगर कुब्ज (ऊँची-नीची भूमि होने के नाते कुब्ज) था, इसीलिए उसका नाम 'कान्यकुब्ज' हुआ। उस नगर के राजसिंहासन पर दश वर्ष तक आसीन रहने पर उनके वेणु नामक पुत्र उत्पन्न हुआ जो वेणुवादन में अधिक रुचि रखता था। राजा वेणु ने देविप्रदत्त एक अत्यन्त

तस्य भूपस्य समये सर्वे भूपाः समन्ततः । त्यक्त्वा तं मन्दपालं च तद्दत्ते संस्थिता गृहे ।।६४
पितुरर्द्धं कृतं राज्यं कुम्भपालस्ततोऽभवत् । राजनीया च नगरी पिशाचविषये स्थिता ।।६५
तत्पतिश्च महामोदो म्लेच्छपैशाचधर्मगः । स जित्वा बहुधा देशाँल्लुण्ठयित्वा धनं बहु ।।६६
म्लेच्छधर्मकरः प्राप्तः कुम्भपालो यतः स्थितः । कुम्भपालस्तु तं दृष्ट्वा कलिना निर्मिता नृप ।।६७
महामोदं समागम्य प्रणनाम स बुद्धिमान् । तदा म्लेच्छपतिः शूरो दत्त्वा तस्मै धनं बहु ।।६८
राजनीयां च नगरीं प्राप्तवान्मूर्तिखण्डकम् । विंशदब्दकृतं राज्यं कुम्भपालेन धीमता ।।६९
तत्पुत्रो देवपालश्चानङ्गभूपस्य कन्यकाम् । समुद्वाह्य विधानेन चन्द्रकान्ति तया सह ।।७०
कान्यकुब्जगृहं प्राप्य जित्वा भूपाननेकशः । पितुस्तुल्यं कृतं राज्यं तस्योभौ तनयौ स्मृतौ ।।७१
जयचन्द्रोरत्नभानुर्दिशं पूर्वां तथोत्तराम् । आर्यदेशस्य वै जित्वा वैष्णवो राज्यमाप्तवान् ।।७२
रत्नभानोश्च तनयो लक्षणो नाम विश्रुतः । कुरुक्षेत्रे रणं प्राप्य त्यक्त्वा प्राणान्दिवं गतः ।।७३
समाप्तिमगमद्वंशो वैश्यपालस्य धीमतः । कुम्भपालस्य शौक्लस्य वैश्यानां रक्षकस्य च ।।७४
विष्वक्सेनान्वयेजाता विष्वक्सेना नृपाः स्मृताः । विसेनस्य कुले जाता विसेनाः क्षत्रियाः स्मृता ।।७५
गुहिलस्य कुले जाता गौहिलाः क्षत्रिया हि ते । राष्ट्रपालान्वये जाता राष्ट्रपाला नृपाः स्मृताः ।।७६
वैश्यपालस्य वै वंशे कुम्भपालस्य धीमतः । वैश्यपालाश्च राजन्यो बभूवुर्बहुधा हि ते ।।७७

---

मन्दपाल उत्पन्न हुए, जिसके राजकाल में सभी राजाओं ने मन्दपाल के त्यागपूर्वक उसके दिये हुए गृहों में निवास किया था । इसने अपने पिता के आधे समय तक राज्यभार को संभाला था और उपरोक्त अन्य राजाओं ने अपने-अपने पिता के समान काल तक । राजा मन्दपाल के कुम्भपाल हुआ, जिसने महामोद को अपनी बुद्धिमानी से लौटा दिया । एकबार पिशाचों के बीच में स्थित राजनीय नगरी के अधीश्वर महामोद नामक म्लेच्छ ने अनेक देशों को पराजितकर उसके धनों को लूटते हुए राजा कुम्भपाल की

लक्षणे मरणं प्राप्ते शुक्लवंशधुरन्धुरे । सर्वे ते क्षत्रिया मुख्याः कुरुक्षेत्रे लयं गताः ।।७८
शेषास्तु क्षुद्रभूपाला वर्णसङ्करसम्भवाः । म्लेच्छैश्च दूषिता जाता म्लेच्छराज्ये भयानके ।।७९

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चये प्रमरवंशवर्णनं नाम तृतीयोऽध्यायः ।३

# अथ चतुर्थोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

भृगुवर्य भृणु त्वं वै वंशं परिहरस्य च । जित्वा बौद्धान्परिहरोऽथर्ववेदापरायणः ।।१
शक्तिं सर्वमयीं नित्यां ध्यात्वा प्रेमपरोऽभवत् । प्रसन्ना सा तदा देवी सार्धयोजनमायतम् ।।२
नगरं चित्रकूटाद्रौ चकार कलिनिर्जरम् । कलिर्यत्र भवेद्वृद्धो नगरेऽस्मिन्सुरप्रिये ।।३
अतः कलिञ्जरो नाम्ना प्रसिद्धोऽभून्महीतले । द्वादशाब्दं कृतं राज्यं तेन पूर्वप्रदेशके ।।४
गौरवर्मा तस्य सुतः कृतं राज्यं पितुः समम् । स्वानुजं घोरवर्माणं तत्रास्थाप्य मुदान्वितः ।।५
गौडदेशं समागम्य तत्र राज्यमकारयत् । सुपर्णो नाम नृपतिस्ततोऽभूद्गौरवर्मणः ।।६

---

अनेक भाँति के बताये गये हैं । चन्द्रवंश के धुरंधर राजा लक्षण (लाखन) के स्वर्गीय होने पर उस कुरुक्षेत्र के स्थल में अधिकांश मुख्य क्षत्रियों का नाश हो गया था । उस समय छोटे ही राजागण शेष थे, जिनकी स्त्रियों से बलात् रमण करके उन म्लेच्छों ने उस भीषण म्लेच्छराज के समय में वर्णसंकरों की उत्पत्ति की ।७२-७९

श्री भविष्यमहापुराण के प्रतिसर्गपर्व में कलियुगीय इतिहाससमुच्चय वर्णन में

पितुस्तुल्यं कृतं राज्यं रूपणस्तत्सुतोऽभवत् । पितुस्तुल्यं कृतं राज्यं कारवर्मा सुतोऽभवत् ।।७
शको नाम ततो राजा महालक्ष्मीं[1] सनातनीम् । त्रिवर्षान्ते च सा देवी कामाक्षीरूपधारिणी ।।८
स्वभक्तपालना चैव तत्र वासमकारयत् । शताद्धाब्दं कृतं राज्यं तेन वै कामवर्मणा ।।९
मिथुनं जनयामास भोगो भोगवती हि सा । विक्रमायैव नृपतिः सुतां भोगवतीं ददौ ।।१०
स्वराज्यं च स्वपुत्राय प्रददौ भोगवर्मणे । पितुस्तुल्यं कृतं राज्यं कालिवर्मा सुतोऽभवत् ।।११
महोत्सवं महाकाल्याः कृतवान्स च भूपतिः । तस्मै प्रसन्ना वरदा काली भूत्वा स्वयं स्थिता ।।१२
कलिका बहुपुष्पाणां सा चकार स्वहर्षतः । ताभिर्भवं च नगरं सञ्जातं च मनोहरम् ।।१३
कलिकाता पुरी नाम्ना प्रसिद्धाभून्महीतले । कौशिकस्तस्य तनयः पितुस्तुल्यं कृतं पदम् ।।१४
कात्यायनस्तस्य सुतः पितुस्तुल्यं कृतं पदम् । तस्य पुत्रो हेमवतः पितुस्तुल्यं कृतं पदम् ।।१५
शिववर्मा च तत्पुत्रः पितुस्तुल्यं कृतं पदम् । भववर्मा च तत्पुत्रः पितुस्तुल्यं कृतं पदम् ।।१६
रुद्रवर्मा च तत्पुत्रः कृतं राज्यं पितुः समम् । भोजवर्मा च तत्पुत्रस्त्यक्त्वा वै पैतृकं पदम् ।।१७
भोजराष्ट्रं वनोद्देशे कारयामास वीर्यवान् । पितुस्तुल्यं कृतं राज्यं गववर्मा नृपोऽभवत् ।।१८
पितुस्तुल्यं कृतं राज्यं विन्ध्यवर्मा नृपोऽभवत् । स्वानुजाय स्वकं राज्यं दत्त्वा वङ्गमुपाययौ ।।१९
पितुस्तुल्यं कृतं राज्यं सुखसेनस्ततोऽभवत् । पितुस्तुल्यं कृतं राज्यं बलाकस्तस्य चात्मजः ।।२०
दशवर्षं कृतं राज्यं लक्ष्मणस्तत्सुतोऽभवत् । पितुस्तुल्यं कृतं राज्यं माधवस्तत्सुतोऽभवत् ।।२१

---

ने सुपर्ण नाम के पुत्र को उत्पन्न किया ।१-६। पश्चात् सुपर्ण के रूपण और रूपण के कायवर्मा हुए, जिन्होंने अपना शक नाम परिवर्तन करके सनातनी महालक्ष्मी की उपासना की । तीन वर्ष तक आराधना करने के उपरांत कामाक्षी रूपधारिणी देवी ने अपने भक्त के पालनार्थ वहीं निवास किया । पचास वर्ष तक

पितुस्तुल्यं कृतं राज्यं केशवस्तत्सुतोऽभवत् । पितुस्तुल्यं कृतं राज्यं सूरसेनस्ततोऽभवत् ।।२२
पितुस्तुल्यं कृतं राज्यं ततो नारायणोऽभवत् । पितुस्तुल्यं कृतं राज्यं शान्तिवर्मा सुतोऽभवत् ।।२३
गङ्गाकूले शान्तिपुरं रचितं तेन धीमता । निवासं कृतवान्भूपः पितुस्तुल्यं कृतं पदम् ।।२४
नदीवर्मा तस्य सुतो गङ्गादत्तवरो बली । चकार नगरीं रम्यां नदीहां गौडराष्ट्रगाम् ।।२५
गङ्गया च तदाहूतोऽभिज्ञो विद्याधरः स्वयम् । तेनैव रक्षिता चासीत्पुरी वेदपरायणा ।।२६
विंशद्वर्षं कृतं राज्यं तेन राज्ञा महात्मना । गङ्गावंशस्ततो जातो विश्रुतोऽभून्महीतले ।।२७
शार्ङ्गदेवस्तस्य सुतो बलवान्हरिपूजकः । गौडदेशमुपागम्य हरिध्यानपरोभवत् ।।२८
दशवर्षं कृतं राज्यं गङ्गादेवस्तु तत्सुतः । विंशद्वर्षं कृतं राज्यं चानङ्गस्तस्य भूपतिः ।।२९
तनयो बलवांश्चासीद्गौडदेशमहीपतिः । पितुस्तुल्यं कृतं राज्यं ततो राजेश्वरोऽभवत् ।।३०
पितुस्तुल्यं कृतं राज्यं नृसिंहस्तनयोऽभवत् । पितुस्तुल्यं कृतं राज्यं धृतिवर्मा सुतोऽभवत् ।।३१
राष्ट्रदेशमुपागम्य जित्वा तस्य नृपं बली । महीवतीं पुरीं रम्यामध्यास्य सुखितोऽभवत् ।।३२
पितुस्तुल्यं कृतं राज्यं धृतिवर्मा सुतोऽभवत् । पितुस्तुल्यं कृतं राज्यं तस्य पुत्रो महीपतिः ।।३३
जयचन्द्राज्ञया भूप उर्वीमायामिति स्मृताम् । नगरीं कारयामास तत्र वासमकारयत् ।।३४
कुरुक्षेत्रे हताः सर्वे क्षत्रियाश्चन्द्रवंशिनः । तदा महीपती राजा महावत्यधिपोऽभवत् ।।३५
विंशद्वर्षं कृतं राज्यं सहोद्दीनेन वै ततः । कुरुक्षेत्रे मृतिं प्राप्ताः सुयोधनकलांशकाः ।।३६
घोरवर्मा तु नृपतिः सुतः परिहरस्य वै । कलिञ्जरे कृतं राज्यं शार्दूलस्तत्सुतोऽभवत् ।।३७

---

बलाक के लक्ष्मण, लक्ष्मण के माधव, माधव के केशव, केशव के सुरसेन, सुरसेन के नारायण, नारायण के शांतिवर्मा हुए, जिसने गंगातट पर शांतिपुर का निर्माण किया । शांतिवर्मा के नदीवर्मा और नदीवर्मा के गंगादत्त हुए, जिस बली ने गौडराष्ट्र में 'नदीहा' नामक नगरी का निर्माण किया । राजा गंगादत्त ने

तदन्वये च ये भूपाः शार्दूलीयाः प्रकीर्तिताः । भूपानां बहुधा राष्ट्रं शार्दूलान्वयसम्भवम् ॥३८
बभूव सर्वतो भूमौ महामायाप्रसादतः । इति ते कथितं विप्र पावकीयमहीभुजाम् ॥३९
कुलं सकलपापघ्नं यथैव शशिसूर्ययोः । पुनरन्यत्प्रवक्ष्यामि यथा जातः हरिः स्वयम् ॥४०

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चये चतुर्थोऽध्यायः ।४

# अथ पञ्चमोऽध्यायः

## कलियुगीयेतिहाससमुच्चयवर्णनम्

### सूत उवाच

मध्याह्नकाले सम्प्राप्ते ब्रह्मणोऽव्यक्तजन्मनः । चाक्षुषान्तरमेवापि महावायुर्बभूव ह ॥१
तत्प्रभावेन हेमाद्रिः कम्पमानः पुनः पुनः । यथा वृक्षस्तथैवासौ तत्कम्पादेव मण्डलः ॥२
नभसो भूतले प्राप्तस्तदा भूमिः प्रकम्पिता । बभूव मुनिशार्दूल सर्वलोकविनाशिनी ॥३
सप्तद्वीपाः समुद्राश्च जलभूता बभूविरे । लोकालोकस्तदा शेषोऽभवत्सोत्तरपर्वतः ॥४
शेषा भूमिर्लयं प्राप्ता मुने मन्वन्तरे लये । सहस्राब्दान्तरे भूमिर्बभूव जलमध्यगा ॥५
तदा स भगवान्विष्णुर्भवेन विधिना सह । शैशुमारं शुभं चक्रं चकार नभसि स्थितम् ॥६
गृहीत्वा सकलास्तारा ग्रहान्सर्वान्यथाविधि । स्थापयामास भगवान्यथायोग्यं पितामहः ॥७

---

हैं। उस शार्दूल (बघेल) वंश राजाओं का पृथ्वी में चारों ओर महामाया के प्रसाद से विस्तृत अनेक प्रकार का राष्ट्र हुआ। विप्र ! इस प्रकार अग्निवंशीय राजाओं के सूर्य-चन्द्रवंश के समान पवित्रकुल का

पुनर्वै ज्योतिषां चक्रैः शोषिता सकला मही । स्थलीभूयायुताब्दान्ते दृश्यमाना बभूव ह ।।८
तदा स भगवान्ब्रह्मा मुखात्सोमं चकार ह । द्विजराजं महाप्राज्ञं सर्ववेदविशारदम् ।।९
भुजाभ्यां भगवान्ब्रह्मा क्षत्रराजं महाबलम् । सूर्यं च जनयामास राजनीतिपरायणम् ।।१०
ऊरुभ्यां वैश्यराजं च समुद्रं सरितां पतिम् । रत्नाकरं च कृतवान्परमेष्ठी पितामहः ।।११
पद्भ्यां च जनयामास विश्वकर्माणमुत्तमम् । दक्षं नाम कलाभिज्ञं शूद्रराजं सुकृत्यकम् ।।१२
सोमाद्वै ब्राह्मणा जाताः सूर्याद्राजन्यवंशजाः । समुद्रात्सकला वैश्या दक्षाच्छूद्रा बभूविरे ।।१३
सूर्यमण्डलतो जातो मनुर्वैवस्वतः स्वयम् । तस्य राज्यमभूत्सर्वं प्राणिनां लोकवासिनाम् ।।१४
दिव्यानां च युगानां च तज्ज्ञेयं चैकसप्ततिः । तदा स भगवान्विष्णुर्विश्वरूपाऽवतारकः ।।१५
विष्णुः पूर्वार्द्धतो जातः परार्द्धाद्वामनः स्वयम् । बालः सत्ययुगे देवो विश्वरूपः सनातनः ।।१६
चतुश्शतानि वर्षाणि परमायुर्नृणां तदा । त्रेतायां यौवनं प्राप्तः पूर्वार्द्धात्सम्भवो हरेः ।।१७
वर्षाणां त्रिशतानां च नृणामायुः प्रकीर्तितम् । द्वापरे वार्द्धिको देवो नृणामायुः शतद्वयम् ।।१८
कलौ तु मरणं प्राप्तो विश्वरूपो हरिः नरो । नृणामायुः शताब्दं च केषाञ्चिद्धर्मशालिनाम् ।।१९
परार्द्धाद्वामनो देवो महेन्द्रावरजो हरिः । चतुर्भुजो महाश्यामो गरुडोपरि संस्थितः ।।२०
विश्वरूपहितार्थाय त्रियुगी सम्बभूव ह । वामनार्द्धाच्च त्रियुगी जातो नारायणः स्वयम् ।।२१
श्वेतरूपो हरिः सत्ये हंसाख्यो भगवान्स्वयम् । त्रेतायां रक्तरूपश्च यज्ञाख्यो भगवान्स्वयम् ।।

---

वर्ष के निरन्तर प्रयत्न करने पर स्थल के रूप में दिखाई देने लगी । उस समय भगवान् ब्रह्मा ने अपने मुख द्वारा सोम को उत्पन्न किया, जिन्हें द्विजराज, महाबुद्धिमान एवं सर्ववेद विशारद कहा जाता है । पुनः भगवान् ब्रह्मा ने अपनी भुजाओं द्वारा क्षत्रराज सूर्य को उत्पन्न किया, जो महाबली एवं राजनीति के विशेषज्ञ हैं । उसी प्रकार ऊरु से वैश्यराज समुद्र को उत्पन्न किया, जिन्हें सरिताओं का पति और रत्नाकर